माघमासः
वर्षम् – ६८
तृतीयोऽङ्कः
विक्रमाब्दः २०७४
युगाब्दः ५११९
५ जनवरी २०१८

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



पतङ्गोल्लासितैर्लोकैः प्रणतो रविरंशुमान्।
सप्तसप्तिर्दिनेशोऽसौ पूज्यो मकरसङ्क्रमे॥

**भारती संस्कृत-मासपत्रिका**

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | राष्ट्रस्याखण्डतायां वैदिकसंस्कृतेः धर्मदर्शनयोश्च ...... | सीताराम महावरः | ५ |
| ५ | लन्दनसेतुः | डॉ. हर्षदेव माधवः | ७ |
| ६ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | ७ |
| ७ | ऋग्वेदे महारण्यस्य स्वरूपं महत्त्वञ्च | डॉ. उषाकिरण यादवः | ८ |
| ८ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | ९ |
| ९ | मातृभूमिस्त्वं, पितृभूमिस्त्वं | दीपक कुमार शर्मा | १० |
| १० | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | ११ |
| ११ | उपनिषदाधारितजीवनदृष्ट्या विश्वकल्याणम् | डॉ. ओमप्रकाश पारीक | १२ |
| १२ | भारतभूमेः सुपुत्राः | अविनाश शर्मा | १५ |
| १३ | महाकविकालिदासस्य आत्माभिव्यक्तिः | डॉ. रामदत्त शर्मा | १७ |
| १४ | मानवजीवने गृह्यसूत्राणां महत्वम् | कैलाशचन्द्रबुनकरः | २१ |
| १५ | अनुसन्धानं तत्र सांख्यिक्याः प्रयोगस्य प्रयोजनानि च | सोनल कुमार जैनः | २३ |
| १६ | विद्यालयेषु सरलसंस्कृतप्रयोगः | अभिनव उपाध्यायः | २६ |
| १७ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः | २७ |
| १८ | संस्कृत समाचारः | प्रबंधसंपादकः | २८ |
| १९ | भारतदेशस्य राष्ट्रभक्ताः | अर्चना शर्मा | २९ |
| २० | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| २१ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**




।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका





**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**

स्व. परमाचार्यः

श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ

स्व. उमाकान्तकेशवआप्टे

( बाबा साहब आप्टे )

स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः

स्वामी विश्वेशतीर्थः

स्वामी सत्यमित्रानन्दगिरिः

स्वामी रामभद्राचार्यः

आचार्यः अविचलदासः

स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः

देवर्षिकलानाथशास्त्री

सम्पादकः

प्यारेमोहनशर्मा

प्रबन्धसम्पादकः

सुदामा शर्मा

सहसम्पादकौ

प्रो. सुरेन्द्रकुमारशर्मा

शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता

ओ.पी. गोयलः

पृष्ठसंयोजनम्

श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्

rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

बाल्ये येन विनाशिताः खरतराः कंसेन सम्प्रेषिताः,

सर्वे ते शकटादयो निशिचराः खेलासु मित्रैः सह।

कालिन्दी च विमोचिता फणिफणात् सम्मृद्य पादाम्बुजैः,

कृष्णोऽसौ शरणं भवेदिति सदा संप्रार्थयामो वयम्।।

## मासावतरणम्

भानोस्तेजोऽपि यस्मिन् हिमहतनलिनीवोपयातं विमान्द्यम्,

उष्णत्वं नहि दृश्यते दिनमणेश्चण्डातपे साम्प्रतम्।

कम्पन्ते बहुशीतलैश्च पवनैर्गात्राणि माघे नृणाम्,

शीतत्राणमवाप्तुमेव सकला वह्निं भजन्ते नराः।।


कार्यालयः

बी-15, भारतीभवनम्

न्यू कॉलोनी, जयपुरम् ( राज. )

ई-मेल sanskritbharti09@gmail.com

माघमासः

वर्षम् 68

वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2074

जनवरी, 2018

अङ्कः - 3

पञ्चवार्षिकशुल्कम् 500/-

आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# इतिहासो न विकार्यः

...✍ पं. प्यारेमोहनशर्मा

**न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक्।** सम्प्रति पद्मावती चलचित्रमादायोपर्युक्त कथनं सत्यं परिज्ञायते। इतिहासः कथयति यत् वासनान्धो निष्ठुरः अलाउद्दीन खिलजी महाराज्ञीं पद्मिनीं प्राप्तुं चित्तौडदुर्गे आक्रमणमकार्षीत्। राणा रतनसिंहो दर्पणे महाराज्ञाः प्रतिबिम्बं प्रादर्शयदित्यस्येतिहासे किमपि प्रमाणं न मिलति। राष्ट्रद्वेषिनः वामाः इतिहासकारा कथामिमामैतिहासिकीं प्रादर्शयन्। अलाउद्दीनो यदा चित्तौडं जेतुं नाशकत् तदा स सन्धिप्रस्तावं चकार राणा रतनसिंहस्तं स्वीचकार। अत्रेदमपि विचारणीयं विद्यते यत् यदि एकाकिनं दुर्गमध्ये राणारतनसिंहो दर्पणे प्रतिबिम्बं प्रादर्शयत् तर्हि तत्र अलाउद्दीनस्य रक्षकाभावे स कथं जीवितो दुर्गात् बहिः समायातः राणा तस्य मस्तकं तत्रैव छेत्तुं शक्नोतिस्म। साधारणः पुरुषोऽपि स्वकीयां पत्नीं स्वशत्रुपुरुषं न प्रदर्शयति।

सम्प्रत्येव समाचारपत्रेषु घटनैका सम्मुखे समायाता-एकः पुरुषः कस्माच्चित् स्वमित्रात् लक्षद्वयरूप्यकाणि व्यापारस्य हानिपूर्त्यै ऋणमनयत्। निश्चितसमये स ऋणमपाकर्तुं न शशाक। स मित्रमकथयत् ब्याजसहितं तव ऋणं शीघ्रमेव दास्यामि किञ्चित् कालं प्रतीक्षा विधेया। एकस्मिन् दिने ऋणदाता मित्रं स्वमित्रं दूरभाषद्वाराऽकथयत् यदि भवान् भवदीयपत्नीं निशायां मम समीपे रात्रिपर्यन्तं उसितुं प्रेषयेत् तदा ऋणं पूर्णमायातमिति मानयिष्यामि न च पुनर्याचिष्ये। श्रुत्वा मित्रं कुद्धं संजातम्। परन्तु स स्वकीयां प्रतिक्रियां न प्राचीकटत्।

होराद्वयानन्तरं स ऋणदातारं दूरभाषद्वारा-असूचयत् मया धनस्य प्रबन्धो विहितः सायं मम गृहम् आगच्छतु। अत्रैवावां सहभोजनं करिष्यावः। कुसीदसहितं धनं च दास्यामि। रात्रौ ऋणदाता तस्य गृहमगच्छत्। चायपानानन्तरं मित्रेण छुरिकाप्रहारेण स घातितः। पुलिसाधिकारिभ्यो यत् सत्यं तत् कथितम्। कथनस्यायमेवाशयो यत् साधारणो भारतीय एवं स्वपत्नीं सर्वात्मना रक्षति तदा राणारतनसिंहः पद्मिनीमलाउद्दीनं प्रादर्शयदिति घटना सत्या वर्तते ? अल्पज्ञा इतिहासकाराः श्रवणमात्रेण तां घटनामवर्णयन्। इदमपि सत्यं वर्तते भारतीयपरंपरानुसारं-अलाउद्दीनस्य स्वागतं चकार। अनया घटनया दुःखितः सेनापतिः गौरश्चिन्तोमत्यजत्। ततश्च राणा रतनसिंह अलाउद्दीनं त्यक्तुं बहिरागच्छत् तदा कपटेन खिलजी रतनसिंहं स्वकीयसैनिकैः बन्दीचकार। घटनानन्तरं गोराबादलौ अप्रतिमशौर्येण स्वप्राणानामाहुतिं दत्वा राणा रत्नसिंहं बन्दीगृहादमोचयताम्।

एतेन क्रुद्धो अलाउद्दीनश्चित्तौडदुर्गम् आचक्राम गौराबादलाभ्यां सह चित्तौडस्यानेके सैनिका युद्धे मग्नाः। स्वल्पावशिष्टाः सैनिकाः केसरियावस्त्राणि धारयित्वा प्राणोत्सर्गाय योद्धुं बहिरागच्छन्। दुर्गाभ्यन्तरे महाराज्ञा पद्मिन्या सह-अष्टसहस्रसंख्याकाः क्षत्रियस्त्रियः अग्नौ जुहवाञ्चक्रुः (जौहरमकार्षुः) त्यागबालिदानयोः स्त्रीधर्मस्य च सा पराकाष्ठा-अविद्यत। सम्पूर्णराष्ट्रस्य गौरवस्वरूपा विद्यते महारानी पद्मिनी अतः स्वप्नेऽपि तस्या अपमानो न विधेयो न च सह्यः। अभिव्यक्तेः स्वातन्त्र्यमादाय यदि चित्रकाराः (फिल्मनिर्मातारः) अस्माकं श्रद्धेयपुरुषाणां श्रद्धाकेन्द्राणां राष्ट्रनायकानामपमानं कुर्युस्तत्किमुचितम्? अतस्तथा न विधेयमिति भारतीया परम्परा, जनता निवेदयति।

# राष्ट्रस्याखण्डतायां वैदिकसंस्कृतेः धर्मदर्शनयोश्च योगदानम्

❑ सीताराम महावरः

**सत्याहिंसागुणैःश्रेष्ठा विश्वबन्धुत्वशिक्षिका।**
**विश्वशान्तिसुखाधात्री भारतीया हि संस्कृतिः।।**

भारतीयसंस्कृतिः मानवजातेः कृते सन्तुलनं दृढताञ्च प्रददाति। एवं प्रतीयते यत् विश्वस्मिन् ऐक्यमखण्डत्वञ्च प्रसारयितुमेव भारतीयसंस्कृतिः प्रादुर्बभूव। भारतवर्षस्य वैदिककालः राष्ट्रीयैकतायाः स्वर्णयुग आसीत्। ऋषिभिः महर्षिभिश्च एतादृशी कामना कृतासीत्।

**संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे संजानाना उपासते।।(1)**
**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्।।(2)**
**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्।।**

अस्माकं संस्कृतेः वैशिष्ट्यं मानवतावादो वर्तते यतो हि संस्कृतिरियं श्रेष्ठमानवीयसिद्धान्तानां मूल्यानामा-दर्शनाञ्च प्रतीकभूतास्ति। भारतीयसंस्कृतेः आर्य-संस्कृतेर्वा वैशिष्ट्यं विद्यते यद् अत्र स्वार्थसिद्धेः अपेक्षया परसेवा समाजसेवा चाङ्गीकृता।

भारतीयसंस्कृतेः ध्येयमस्ति यत् जनः चरमलक्ष्यं प्रति जागरूको भवेत् तत् प्राप्तये च प्रयत्नशीलः स्यात्। शारीरिक-मानसिक-आध्यात्मिकशक्तेः विकास एव अस्य साधनं मार्गो वा वक्तुं शक्यते। यस्यां संस्कृत्यां एतासां शक्तीनां विकासस्याधिक्यं भवेत् सैव संस्कृतिः तावत्युत्कृष्टा भवितुमर्हति। अस्यां परीक्षायां भारतीय-संस्कृतेः उत्कर्षो दरीदृश्यते। अस्माकं संस्कृतिः माधुर्य सौहार्दप्रेमभावनादिकोमलानुभूतिभिः मानवहृदयस्य परिष्कर्त्री तथा तच्चेतनाम् उदात्तं व्यापकं च कर्तुं समर्था सेत्स्यति।

भारतीय संस्कृतिः मानवता च –

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।(3)**

मनुस्मृतेः कथनानुसारं प्राचीनभारतीयसंस्कृतिः तादृशी उदारा विशाला च चकास्ति यस्यां सकलविश्व-संस्कृतेर्महत्वपूर्णा अंशाः समाहिताः भवन्ति। ''वसुधैव कुटुम्बकम्'' इति वाक्यानुसारम् अस्माकं संस्कृतौ संकुचितभावनायाः प्रवेशो भवितुं नार्हति। इतिहासेन ज्ञायते यत् प्राचीना भारतीया मनीषिणः भारतीय-भौगोलिकसीम्नि एव न अपितु भारतात् बहिरपि भारतीयसंस्कृतेः प्रचारं प्रसारञ्च कृतवन्तः।

राष्ट्रस्यैकताया अखण्डतायाश्च परिपोषकम् अस्माकं जीवनमूल्यं भारतीयवैदिकसंस्कृतेः आधारभूमिर्विद्यते। विश्वसंस्कृतिः भारतीयसंस्कृतेः अधमर्णा वर्तते। अद्य दानवतायाः भीषणप्रहारैः मानवता छिन्ना भिन्ना च जायमाना दृश्यते। जनो जनस्य शत्रुः जातोऽस्ति। स्वार्थपरतया नहि कोऽपि अन्यस्मिन् विश्वसिति। यदि राष्ट्रस्याखण्डतायाः रक्षाभीष्टा तर्हि भारतीयसंस्कृतिरेव तत्र योगदानं कर्तुं समर्था। अद्य सकलं विश्वं भौतिकता-वादसंस्कृत्यवलम्बितत्वात् स्वजीवनं सुखोपभोगमयं यापयितुं चेष्टते तथा लोकस्य ध्रुवसत्यात् मृत्योः बिभेति। विश्वमेतत् आत्मनोऽमरत्वं पुनर्जन्म चास्वीकृत्य व्यथते। परमस्माकं संस्कृतौ यत्र पुनर्जन्म सिद्धान्तः **''पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम्''** इत्येवं रूपः तथा ''आत्मतत्व'' विषयश्च यदा ज्ञायते तदा मृत्योर्भयं विनश्यति। गीतायां श्रीकृष्णेनोक्तम्।

**''जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।**
**तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि।''(4)**

धर्मस्य योगदानम् राष्ट्रस्यैकतायामखण्डतायाञ्च धर्मस्यापि प्रभूतं योगदानम् अवर्तत। समग्रेऽस्मिन् विश्वे भारतमेवैतादृशं राष्ट्रमस्ति यत्र अनेकधर्मावलम्बिनो निवसन्ति। अयं गंगायमुनासंगम इव भारतीयसंस्कृतेः परिणामोऽस्ति यत् सर्वे धर्मावलम्बिनः स्वस्वधर्मानुकूल- माचरणं कुर्वन्तः अस्मिन् भारतदेशे विश्वबन्धुत्वभावनया समं निवसन्ति।

**इमे मे गङ्गे यमुने सरस्वति**
**शुतुद्रि स्तोमं सचता परुष्णिया।**
**असिक्न्या मरुद्वृधे वितस्तया**
**नींकीये शृणुहया सुषोमया।।(5)**

अनेन मन्त्रेण ज्ञायते यत् आर्यावर्त्तनिवासिनः स्वदेशस्य सरितोऽपि देवतारूपेण मन्यन्ते स्म तथा राष्टैक्यस्य कृते कामयन्ते स्म।

**अहो अमीषां किमकारि शोभनं**
**प्रसन्न एषां स्विदुत स्वयं हरिः।**
**यैर्जन्म लब्धं नृषु भारताजिरे**
**मुकुन्दसेवौपयिकं स्पृहा हि नः।।(6)**

आर्यजनाः स्नानं कुर्वन्तः सप्तनदीनां स्मरणं कुर्वन्ति स्म।

**गङ्गे च यमुने चैव गोदावरि सरस्वति।**
**नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु।।(7)**

अस्मिन् स्नानमन्त्रे अखण्डभारतस्य भव्यकल्पना कृतास्ति यत्र इमे सप्तनद्यः प्रवहन्ति स एव अखण्डभारतदेशः।

**दर्शनस्य योगदानम्ः** - चिन्तनेन ज्ञानं परिष्क्रियते विचाराः परिपूर्णाः भवन्ति, अन्धविश्वासतः मुक्तिर्भवति इयमेव प्रक्रिया दर्शनस्याधारोऽस्ति। अस्य विकासेनैव ज्ञानक्षेत्रं वर्धते। भारतीयदर्शने विचारेण ज्ञायते यत् भारतस्य विशेषभौगोलिकपरिस्थतयोऽनादिकालात् अत्र निवासिनः जनान् शान्तिप्रियान् गम्भीरांश्च कृतवत्यः अतः साधारणं जीवनं, उन्नतविचारा, अन्तःकरणस्य प्रशान्त-भावना, सत्यप्रियता, पारमार्थिककारणेन संसारस्य निस्सारता, दैवीयशक्तौ श्रद्धा, भक्तिः, आत्मसमर्पणञ्च जीवनस्य समस्यासमाधाने तत्परता, परमसुखस्यानन्दस्य वा प्राप्तौ पूर्णजिज्ञासा, अदम्यं साहसञ्च इत्येतेषां गुणानामुपस्थितिः भारतीयजनानां जीवने विभिन्न-कार्येषु प्रत्यक्षाप्रत्यक्षरूपेण प्राप्यते। सामान्यतया कः संसारः? किम् रहस्यं जीवनमृत्योः? सुखदुःखयोः कः सारः? अहं कः इत्येतेषां मूलेऽव्यक्तरहस्यबोध एव दर्शनम्?

भारतीयसंस्कृतेः प्राणस्वरूपाः अस्माकं वेदाः उपनिषदः केवलं भारतीयानामेव कृते न अपितु सकलमानवजातेः कृते भौतिकवादात् बहिरानीय आत्मशान्तेः आत्मतत्त्वस्य चान्वेषणे उपयोगिनोऽ-जायन्त। परिणामतः मानसिकशान्तिः प्राप्यते।

**उपसंहारः**- अस्माकं भारतीयवैदिकसंस्कृतिः धर्मो दर्शनञ्च जनमानसं निस्पृहजीवनस्य कृते प्रेरयन्ति। उन्मुक्तवातावरणे समस्तमानवजातेः कृते कल्पवृक्षवत् उपयोगिनः सन्त्येते। वैदेशिका अपि एतेषां परोक्षरूपेण दोहनं कुर्वन्तः स्वात्मानं शान्तिमयवातावरणे जीवितुं समर्थान् कृतवन्तः। अत्रागत्य आत्मशान्त्यवाप्तये कृतसंकल्पाः साधनपरायणाश्च ते दृश्यन्ते।

**''व्याख्याता'' (व्याकरणशास्त्रे)**
**राजकीय लक्ष्मीनाथ शास्त्री संस्कृत महाविद्यालय**
**चीथवाडी, जयपुर**

**सन्दर्भ :-**

1. ऋग्वेद 10/191/2, 2. हितोपदेश 1/69, 3. मनुस्मृति अ 2/20, 4. श्रीमद्भगवद्गीता 2/27, 5. वृहद् संस्कृत-निबन्धकलिका पृष्ठ 115, लेखक आचार्य शिव प्रसाद द्विवेदी प्रकाशन भारतीय विद्या प्रकाशन दिल्ली वाराणसी, 6. वृहद् संस्कृतनिबन्ध कलिका पृष्ठ 116, 7. वृहद् संस्कृतनिबन्ध कलिका पृष्ठ 116.

मुक्तकवितापृषताः

# लन्दनसेतुः

❑ डॉ. हर्षदेव माधवः

थेम्सनदीं स्वबाहुपाशे
निबध्य स्थितोऽयं सेतुः।
उभयपार्श्वयो- र्भव्येतिहासो दुर्गायते
सेतौ धावन्ति वर्तमानगतिर्वाहनचक्रैस्सह
थेम्सजले प्रतिबिम्बमिषेण
नद्या विश्रम्भकथामग्नोऽस्ति सेतुः।
ब्रिटेनराष्ट्रध्वजो
विश्वस्य प्रभुत्वं विस्मृत्य वेपते पूर्वस्मृतौ।
पर्यटकानां दृष्टिपाता
मधुकोषे मधुमक्षिकावत् सक्तास्सन्ति सेतौ,
तदैव जरासन्धस्य पार्श्वद्वयमिव
सेतोः पार्श्वे विभक्ते भवतः।
शनैश्शनैः पार्श्वे भ्रातराविव विभक्तौ भवतः।
मध्यजले महाप्लवोपविष्टाः पर्यटका
विश्वविजेतार इव हर्षचीत्कारान् कुर्वन्तो निर्गच्छन्ति।
अतीते तथैव प्राविशन् महासाम्राज्यस्य विजयपोताः।
कतिपयक्षणानन्तरं कलहोत्तरं
पुनरपि सौहार्दं स्थापयतौ
सुहृदौ भूत्वा...........
पार्श्वे संयुक्तौ ...........
स्मराम्यहमाङ्गलकाव्यपंक्तिम्
**"London bridge is falling"**
किमिदं पतनं विश्वप्रभुत्वस्य ? साम्राज्यवादस्य ?
साम्राज्यमिषेण धर्मप्रसारस्य ?
संस्काराणाम् ? प्राचीनसभ्यतायाः ?
ब्रिटिशविधिनियमानां दासशासकानाम् ,
पुनरपि सन्धानं जातं पार्श्वयोः।
ब्रिटेननागरिकाः सौजन्यमयं स्मितं विस्तीर्य
गच्छन्ति मां प्रति ...........
मम श्यामवर्णोऽपि संयोज्यते रक्तवर्णेन।।

8, राजतिलक बंगलॉ, आबादनगर,
बसस्टोप के पास, बोपल, अमदाबाद-380058

प्रेरकप्रसङ्गशतकम् — एकोनषष्टितमः प्रसङ्गः

# मौनशिक्षणाम्

❑ श्रीमती आराधना धर्माधिकारी

बाल्यावस्थायास्तस्यां शान्तायां सन्ध्यायां पितृचरणाः मां तां शिक्षामशिक्षयन्। यस्याः हस्तान्तरणं न सर्वेषां वशेऽस्ति। बाल्यावस्थायास्तं विशिष्टं दिवसं कथं विस्मरेयम्। तस्मिन् दिने पितृचरणानां क्षेत्रे गमनार्थमपृच्छन्। अहं छात्रावासाद् गृहे आगत एवासम्। सर्वदैव क्षेत्रे गमनार्थं निषेधकारिणः पितृचरणस्यायं प्रस्तावः स्वागतार्ह एवासीत्। तत्राप्यश्वयानावरोहणं, वाह का वार्ताऽऽसीत्? अस्माभिः पूर्ण एव दिवसः क्षेत्रेषु व्यतीतः, गवां सुरक्षा कृता, क्षेत्रेषु कार्यं कुर्वद्भिः श्रमिकैः सह भोजनं कृतम्। ट्रेक्टरारोहणमपि कृतम्।

सायं गृहे परावर्तनसमये पूर्वत एव रोमाञ्चकेऽस्मिन् दिवसे पितृचरणैरेकाऽन्यापि घटनायोजिता। अश्वयानं चालयिष्यसि। संचालनार्थम् एव सर्वाणि सूत्राणि स्वहस्ते। इदं मादृशाय कस्मै बालकाय न रोचेत। मम स्वीकृतिं प्राप्यैव पितृचरणाः अश्वयानमारूह्योपविष्टाः। मया अश्वयानसंचालनमारब्धम्। संचालने पितृचरणैः प्रोक्तेषु नियमेष्वप्यवहितम्। पुनश्चिन्तितं गतिं वर्द्धयेयम्। प्रेरितोऽश्वः अधावत्। तीव्रम् अतितीव्रम्। अत्र गतिसूचकं नासीदेव नचाश्वः संकटस्य संदेहं जानाति। शीघ्रमेव ज्ञातं त्रुटिरभूदिति। मया सूत्राणामाकर्षणे पूर्णा शक्तिः प्रयुक्ता। सूत्राणां संघर्षणेन तव हस्तयोः पीडा समभवत्, सन्धिषु रक्तमप्यदीप्यत। हृद्गतिरप्यवशैवासीन्, श्वासगतिरपि भस्त्रिकेव चलति। कथमपि गतिर्मन्दीभूता। मया परावृत्त्य पितृचरणान्प्रति प्रत्यवलोकितम्। मे महान् विस्मयोऽभूत्। ते शान्तया दृष्ट्या सर्वं दृश्यमवलोकयन्त आसन्। ननु किंचिदभूदेव न। तद् दृश्यं मम नेत्रयोरद्यापि वसति। अहं पितृचरणानवदम् अहं नैव चालयितुं वाञ्छामि। ते उत्थाय समागताः सूत्राणि तैः गृहीतानि।

अधुनाऽहं पितामहः संजातः, ज्ञातं मया कियद्दुष्करं जीवनसंयमनम् कदाचित् कदाचित्तु कथयितुं वाञ्छति मनः, अहं चालयितुं नैव वाञ्छामीति।

218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्

# ऋग्वेदे महारण्यस्य स्वरूपं महत्त्वञ्च

❑ डॉ. उषाकिरण यादवः

पृथ्वी असंख्यचराचराणां लघुविशालतत्त्वानामेका जननी अस्ति।[1] महानदीमहासमुद्रमहापर्वतादय इव महारण्यमपि विद्यतेऽस्याम्। अरण्यानीति पदम्पि महारणयस्य पर्यायो विद्यते।[2] ऋग्वेदे महारण्यस्य वर्णन मरण्यानीतिनाम्ना कृतमरण्यानीसूक्ते। इदम् ऋग्वेदस्य दशममण्डलस्य षट्चत्वारिशंदुत्तरशततमं सूक्तमस्ति। सूक्ते षण्मन्त्राः सन्ति। सर्वेषां मन्त्राणां द्रष्टा देवमुनिरैरम्माद: अस्ति। मुनिनारण्यान्याः स्वरूपमहत्त्वयोः यद् वर्णनं कृतन्तदित्थमस्ति –

सर्वप्रथमम्मुनिरण्यानीदेवीं सम्बोधयन् कथयति पृच्छति च यत् त्वं पश्यत एव समक्षमन्तधार्हिता भवसि। त्वं ग्रामे कथन्न वससि निर्जने वने किमर्थम्? किं त्वं तत्र भयभीता न भवसि ?[3]

अग्रे ऋषिः महारण्यस्य चित्रणं करोति यत्तत्र विविधलघुविशालपशुपक्षिणः विभिन्नरूपेषु शब्दान् कुर्वन्ति तैः प्रतीयते यत्ते वीणावादनेन अरण्यानी देव्याः यशोगानं कुर्वन्ति।[4]

तत्र गावः अन्यप्राणिनश्चापि विचरन्ति। लताकुञ्जादयः प्राणिनां गृहाणीव दृश्यन्ते। सायंकाले ततः शकटास्तृणकाष्ठादीन् गृहीत्वा निर्गच्छन्ति।[5]

वन्यदृश्यस्य वर्णनं कुर्वन् मुनिर्कथयति यत् कश्चन जनः गाम् आह्वयति, कश्चन काष्ठं छिनत्ति यो जनः रात्रावरण्यान्यां निवसति सः भयभीतो भूत्वाऽक्रन्दति इति मन्यते।[6]

मुनेर्मतमस्ति यदरण्यानी कस्यापि हिंसां न करोति न च कश्चिदपि तस्याः क्षतिङ्करोति। अन्यप्राणिन इव मनुष्या अपि वन्यफलानि खादित्वा सुखेन वसन्ति।[7] वन्यफलैः सह तत्रान्येऽपि कस्तूर्यादयो सुगन्धिपदार्थाः जायन्ते, कृषिबलरहितमन्नमप्युत्पद्यतेऽतः अरण्यानी मनुष्येभ्यो हितकारिणी विद्यते। अन्ते मुनिरण्यानीं नृणां मातरं कथयन् स्तौति।

**निष्कर्ष** :- देवमुनिना कृतेन वर्णनेन ज्ञायते तथ्यमिदं यन्महारण्येऽरण्यदेव्याः स्वामित्वं भवति। आरण्यक-पदार्थेषु वन्यजीवानाम्मौलिकाधिकारो भवति।

मनुष्यैः वनदेव्या अनुमत्या तत्रस्थपदार्थानाम् आवश्यकतानुरूपमुपभोगः करणीयः। अनेन विधिना वन्य सम्पत्तिः समृद्धा भवितुं शक्या। अरण्यविनाशस्य भयावहाः दुष्परिणामाः सर्वेषां समक्षं विद्यन्ते। अरण्यमारण्यकजीवाश्चास्माकं संस्कृतेरभिन्नावयवाः सन्ति, तेषां संरक्षणमस्माकं कत्तव्यम् अस्ति। सूक्तमिदमस्यैव कर्त्तव्यपालनस्य पथप्रदर्शकं विद्यते।

सन्दर्भा :- 1. अथर्ववेदे पृथ्वीसूक्तस्य 1-63 मन्त्राः। 2. महारण्यमरण्यानी गृहारामास्तु निष्कुटाः। अमरकोशे 4/1, 3. अरण्यान्यरण्यान्यसौ य प्रेव नश्यसि। कथा ग्रामं न पृच्छति न त्वा भीरिव विन्दतीम्।।, 4. वृषा रवाय वदते यदुपावति चिच्चिकः। आधाटिभिरिव धावयन्नरण्यानिर्महीयते।।, 5. उत गाव इवादन्त्युत वेश्मेव दृश्यते। उतो अरण्यानिः सायं शकटीरिव सर्जते।। 6. गामङ्गैष आह्वयति दार्वङ्गैषो अपावधीत्। वसन्नरण्यान्यां सायमक्रुक्षदिति मन्यते।।7. न वा अरण्यानिर्हन्त्यश्चेन्नाभि गच्छति। स्वादोः फलस्य जग्ध्वाय यथाकामं निपद्यते।। 8. आञ्जनगन्धिं सुरभिं वह्वन्नामकृषीवलाम्। प्राहं मृगाणां मातरण्यानिमशंसिषम्।।

**वरिष्ठप्रवक्त्री,**
**सेमुमाराजकीये कन्यामहाविद्यालये**
**भीलवाड़ानगरम् ( राजस्थानम् )**

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# उर्दूपन्यासस्य संस्कृतानुवादः

संस्कृतभाषा खलु विश्वजनीना, प्राचीनतमा, सर्वलोकाराध्या भाषा। तस्या वाङ्मयस्य समृद्धौ सर्वविधानां विदुषां, सर्वधर्मानुयायिनां कवीनां लेखकानां च योगदानं शताब्दीभ्यः सुविदितम्। मुस्लिमविदुषां संस्कृतलेखनमपि शताब्दीभ्यः प्रचलतीति विदन्त्येव सुधियः। रहीमनाम्ना सुपरिचितस्य अब्दुर्रहीम-खान-खानाख्यस्य कवेः कृतिः गङ्गास्तुतिः संस्कृतपद्येषु निबद्धा यथा सुप्रतिष्ठिताऽभूत्तथैव ज्योतिर्विज्ञानस्य ग्रन्था अपि तेन संस्कृते निबद्धाः सुपरिचिताः सन्ति। अस्मिन् युगेऽपि शतशो मुस्लिमविद्वांसः संस्कृताध्ययने लेखने च निरताः सन्ति। मुंबईस्थ हजरत जंगली-पीर-दरगाह-प्रतिष्ठानस्याधिपतिः (मुतवल्ली) पं. गुलामदस्तगीर-विराजदारः संस्कृतस्य प्रौढो विद्वान्, प्रतिष्ठितो वक्ता, समादृतो लेखकश्चास्तीति तथ्यमपि ज्ञातं स्याद् बहुभिः संस्कृतसेवकैः।

मुस्लिमलेखकानां संस्कृतवाङ्मये किं योगदान-मिति विषयमादाय भूयान् शोधोऽपि संस्कृतज्ञैर्विहितो-ऽस्ति, बहवो ग्रन्था अपि प्रकाशिताः सन्ति। सागर-विश्वविद्यालयतोऽप्येक एतद्विषयको ग्रन्थः प्रकाशितो दृष्टोऽभून्मया दशकचतुष्टयात् पूर्वम्। वाराणस्या-मप्येवंविधमेकं प्रकाशनसंस्थानमस्तीति ज्ञात्वा सुमहान् सन्तोषः स्यात् संस्कृतज्ञानाम्। अखिलभारतीयमुस्लिम-संस्कृतसंरक्षण एवं प्राच्यशोधसंस्थाननामकमिदं प्रतिष्ठानं काशीहिन्दुविश्वविद्यालयक्षेत्रे स्थितमस्ति यत्र शोधकार्यं, लेखनकार्यं, प्रकाशनकार्यमनुवादकार्यमित्यादीनि कार्याणि संजायन्ते येषु मुस्लिमा, ब्राह्मणाः, पण्डिताः, सरस्वतीसेवकाः सर्वविधा विना पूर्वाग्रहं कार्यरता विद्यन्ते इति ज्ञात्वा को न प्रमोदेत? संस्थानस्यास्यानेकानि प्रकाशनानि विद्यन्ते। एकं प्रकाशनं सपद्येवाऽस्माभिर-धिगतं सुभृशमानन्दयिष्यति पाठकान्।

मिर्जामुहम्मद हादी रुसवा इतिनाम्ना प्रसिद्धस्य उर्दूउपन्यासकारस्य सुप्रथित-मुपन्यासम् ''उमराव जान अदा'' इत्याख्यं संस्कृतेऽनूद्य प्रकाशितोऽयं ग्रन्थः संस्कृतगद्यस्य विशिष्टमेवैकं रूपं प्रस्तौतीति विशिष्यो-ल्लेखनीयः सञ्जातः। अवधप्रान्तस्य मध्यकालीना (अर्थात् अष्टादशीं शताब्दीमारभ्यैकोनविंशीं शताब्दीं यावत् सम्पोषिता) नवाबसमाजसम्बद्धा सामाजिकी जीवन-पद्धतिर्बहुभिः कारणैर्विशिष्टमध्ययनं प्रेरयति। सर्वविधा विलासाः, सुन्दर्यो गणिकाः, सङ्गीत-नृत्य-काव्यादीना-मानन्दाः, कतिधा पारस्परिकषड्यन्त्रघटनाः इत्यादि तात्कालिकं वर्ण्यवस्तु न केवलं कथासु, उपन्यासेषु, काव्यरचनासु च प्रमुखतया उर्दूभाषायां हिन्द्यां वा निबद्धं विपुलमात्रायां, किन्तु बहुषु चलचित्रेष्वपि चित्रितं सुतरां लोकप्रियमभूदिति स्मरेयुः प्राचीनाश्चलचित्रप्रेमिणः। एकोनविंश्या शताब्द्या उत्तरार्धे विंश्याश्च प्रारम्भे आङ्गल-शासने भारते यथा तदानीन्तनसमाजव्यवस्थायां भूयान् हस्तक्षेपः कृतः, अवधनवाबप्रभृतयो मोगलसम्राजश्च निर्वासितास्तत्सर्वमितिहासे सुपरिचितमेव।

अतएव तदानीन्तनस्य समाजस्य चित्रमद्यापि पाठकानाकर्षेदिति स्वाभाविकमेव। सुप्रसिद्धेन उर्दूलेखकेन मिर्जामुहम्मद हादी रूसवा (1857 ई. वर्षे लब्धजन्मना, 1931 ई. वर्षे च दिवंगतेन) महोदयेन अवधप्रदेशीयायाः सुकुमार्याः सरलहृदयाया गणिकाया उमराव जान इत्याख्याया जीवनवृत्तमादाय विलिखित उपन्यासः ''उमराव जान अदा'' शीर्षकः (1899 ई. वर्षे प्रकाशितः) सुतरां लोकप्रियः प्रतिष्ठितश्चाऽभवत्। उर्दूभाषायां लिखितोऽयमुपन्यासो भाषान्तरेष्वनूदितः। एतदुपरि विंश्याः शताब्द्याः पर्यन्ते यच्चित्रपटम् ''उमरावजान'' नाम्ना निरमीयत, प्रादर्शि च समस्तेऽपि देशे, तदपि सुभृशं लोकप्रियमभूत्। तस्य गीतानि त्वद्यापि लोककण्ठेऽमरत्वं बिभ्रति।

वाराणसेयस्य युवविदुषः श्वेतकेतुनाम्नो मनसि उर्दूपन्यासस्यास्य संस्कृतेऽवतारणस्याभिलाषो जागृत इति स्वाभाविकमेव यतो हि तादृशानां युवविदुषां सम्पर्कस्तदा मुस्लिम संरक्षणसंस्थानादिभिः संस्थाभिः सह सञ्जायमानः प्रेरयति स्म तान् विभिन्नभाषासाहित्य सम्पर्कसंसाधनाय। एतस्यैव परिणतिरस्ति ''उमरावजान अदा'' संस्कृतानुवादः। 25 विशालेषु प्रकरणेषु निबद्धेऽस्मिन्नुपन्यासे लखनऊनगरीयाया ऊनविंशशताब्दीयाया गणिकाया अस्या जीवनं प्रेरकशैल्यां निबद्धमस्ति। मध्ये मध्ये उर्दूभाषायाः फारसीभाषायाश्च पद्यांशा उक्तयश्चोपन्यासे उद्धृताः स्युरिति स्वाभाविकमेव। सर्वेषामेषां विशुद्धे संस्कृतेऽनुवादः काठिन्यं जनयति, नवाबीयायाः सभ्यताया अनेके शब्दा अप्यनूद्या भवन्ति। सर्वेषामेषां सुरुचिरोऽनुवादः श्वेतकेतुना विहित इति सन्तोषास्पदम्।

उपन्यासस्य प्रारम्भे लेखकेन मिर्जा मुहम्मद हादी रुसवा इत्यनेन प्रकाशनावसरे (1899 ई. वर्षे) विलिखिताया भूमिकायाः ''कथामुखम्'' शीर्षकः संस्कृतानुवादो लेखकेन कृतः प्रकाशितोऽस्ति। विशिष्योल्लेखनीयाऽस्ति पुस्तकस्यास्य आङ्गलभाषानिबद्धा विस्तृता 60 पृष्ठेषु प्रसृता भूमिका यस्यां ग्रन्थस्य विशेषा अपि विवेचिताः सन्ति, उर्दू-पारसीकप्रभृतिभाषाणां शब्दविशेषाः कथं संस्कृतेऽनूदिता इत्यस्य विस्तृता सूची, विमर्शश्चाऽपि समुल्लिखिताः सन्ति। इत्थं नूतनाः पन्थानोऽनुवादेनानेनाऽनुसृताः भाविभ्यो लेखकेभ्योऽनुवादकेभ्यश्च प्रदर्शिता अपीति उपन्यासानुवादस्यास्य विशिष्य स्वागतं संस्कृतसमाजे भवेदित्याशास्यते। सर्वे युवानोऽनुवादकाः सम्पादकाश्च साधुवादानर्हन्ति।

**''उमरावजान अदा'' (उर्दूलेखकस्य मिर्जा मुहम्मद हादी रुसवा इत्यस्योपन्यासस्य संस्कृताऽनुवादः) अनुवादकः-श्वेतकेतुः सम्पादकौ प्रदीपकुमारमिश्रः प्रियव्रतमिश्रश्च, प्रका. अखिलभारतीय मुस्लिम संस्कृत संरक्षण एवं प्राच्यशोधसंस्थान, सत्यम् नगरकालोनी, भगवानपुर, बनारस हिन्दू यूनिवर्सिटी वाराणसी 5, पृ.सं. 300 मू. 500/-.**

# मातृभूमिस्त्वं, पितृभूमिस्त्वं

❑ **दीपक कुमार शर्मा**

**वयं शरणं तव, हे जगज्जननि!**
**यदा यदा मम हानिर्भवति,**
**तदा सदा त्वं, मंगलदात्री।**
**भारतभूमिः त्वं, आर्यभूमिः त्वं**
**वयं शरणं तव, हे जगज्जननि!**
**सस्य श्यामला, सरसा सरला।**
**विश्वंभरा त्वं, वंदे जननि।**
**शक्तिभूमिः त्वं, मुक्तिभूमिः त्वं।**
**वयं शरणं तव, हे जगज्जननि !**
**हिमगिरिस्तव, मस्तके राजति।**
**हिन्दसागरः पदकमलं क्षालयति।**
**धर्मभूमिस्त्वं, कर्मभूमिस्त्वं।**
**वयं शरणं तव, हे जगज्जननि!**
**बिंध्यगिरिस्तव, कटि तटं शोभते।**
**थारमरुस्थलं, स्वर्णमिव दीप्यते।**
**दिव्यभूमिस्त्वं, तीर्थभूमिस्त्वं।**
**वयं शरणं तव, हे जगज्जननि!**
**नमति सदा तव, चरणे अम्ब।**
**वदति दीपकः, हे जगदम्बे।**
**हिन्दभूमिस्त्वं, जन्मभूमिस्त्वं।**
**वयं शरणं तव, हे जगज्जननि!**

**पाटन, भीलवाड़ा**

**श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने-**

**त्रयस्त्रिंशः प्रसङ्गः**

# सत्यसखायः

❑ वेणीमाधव गो. धर्माधिकारी

श्रीमन्तो अप्पाजी जोशीत्युपाख्याः श्रीहरिकृष्ण-महोदया वर्णयन्ति। दादारावपरमार्थमहोदयाः बाबा-साहिबआप्टेमहोदयस्य दक्षिणवामहस्ताविवास्ताम्। उभावेव संघस्य प्रथमप्रचारकावास्ताम्। स्थाने स्थाने च संघस्य प्रचारकार्यार्थं निस्सृतौ। साम्प्रतं चोभावपि परलोकं प्राप्तौ। द्वावप्यभिन्नौ वयस्यौ। अथाप्युभयोः प्रकृतौ प्रचारपद्धतौ च महदन्तर एवासीत्। स्व. बाबामहोदयाः शान्तस्वभावा आसन्। एकैकं शब्दं संतोल्य वदन्तिस्म। यावच्छक्यं वैदेशिकभाषायाः परित्यागं कुर्वन्तिस्म परं दादारावपरमार्थमहोदयानामेतद् विपरीतमासीत्। तेषां प्रवचनानि भावपूर्णान्यासन् तेषां प्रयत्नः न्यूनसमयेऽधिक-भाषणस्यासीत्। तेषां प्रवचनेषु तृतीयांशः आङ्लभाषायाः भवतिस्म। परं विशेषतस्तेषां प्रवचनं रोचते स्म। प.पू. द्वाक्तरमहोदयानां कृपया उभावपि मम मित्रे आस्ताम्। अस्माकं प्रेम परस्परं प्रगाढं सरलमासीत्।

पश्चाच्च किञ्चिदेवमभूद् यद् दादारावमहोदयानां मनसि समागतमीश्वरभक्तिं विधाय जीवनं सार्थकं करणीयम्। इदं विचारमनुसृत्य ते संघकार्यादवकाशं गृहीत्वा पाण्डिचेर्याश्रमं गत्वा तत्रैकाकिनः स्थिताः।

बाबामहोदयेभ्यः परमार्थमहोदयानां वियोगः खेदजनकः समभवत्। मयावबोधितं भवन्तश्चिन्तां माकुर्वन्तु अस्माकं परमार्थमहोदयाः परावृत्त्यास्मास्वेव आगमिष्यन्ति। परमाश्वासनमात्रेण न तेभ्यः सन्तोषः। ते चिन्तयन्तिस्म अस्माभिः किमपि करणीयमिति।

भूयश्च बाबामहादेयाः मूत्राशयोपरि शल्यचिकित्सार्थं शोलापुरे संघचालकानां डा. मुले महोदयानां समीपे समागताः। एतदर्थं च ते धनराजचिकित्सालये स्थिताः। तत एव एकेन स्वयंसेवकेन मह्यं पुण्यनगरे पत्रं प्रेषितम्। अहं तेषु दिवसेषु संघकार्यार्थं पुण्यनगरे समागत आसम्। अस्मिन् पत्रेऽहं मिलितुं समाहूत आसम्। तेषां शल्यचिकित्सा जातेति श्रुत्वा मयापि मिलितव्यमेवासीत्। एवमेव शोलापुरे गतः। मिलनमभूत् स्वास्थ्यविषये प्रश्नादिकमजायत अन्ते च ते मुख्यवार्तामकथयन्। ते अवदन् किमपि कुरुत परं दादारावमहोदयाः परावृत्य संघकार्ये संलग्ना भवेयुरित्यावश्यकम्।

मया कथितम् भवान् वृथैव चिन्तां करोति। ते आगमिष्यन्ति, स्वयमेवावगमिष्यन्ति। यथा जलयानस्य खगः उत्पत्य पुनर्जलयानमेवागच्छति। परमार्थमहोदयाः अपि अस्माकं मध्ये आगमिष्यन्त्येव। द्राक्तरमहोदयैर्ये संस्काराः प्रदत्ताः तद्बलजात् ते संघाद् बहिः स्थातुं नैव शक्नुवन्ति।

मयैवं बोधिते तेऽवदन् परमार्थस्यास्मासु परावर्तनं विना मम चित्तं व्याकुलमस्ति। यतो भवन्तो वाञ्छन्ति मम स्वास्थ्यलाभः स्यात् तदा पुण्यनगस्य संघशिक्षावर्गसमाप्तौ पाण्डिचेर्यां गत्वा वार्तां कुर्वन्तु भवन्त एतानानेतुं समर्थाः। अतएव मे आग्रहः।

तेषामाग्रहस्वीकरणं मे कर्तव्यमेवासीत्। अहं पुण्यनगरे परावृतः। पाण्डिचेर्यां गमनापेक्षया पुण्यनगरादेव पत्रप्रेषणार्थं निर्णीतम्। अहं जानन्नासम् यद् यदि पाण्डिचेर्यां स्युस्तदा मत्पत्रं प्राप्यावश्यमेवाग-मिष्यन्ति। तदेवाभवत् मत्पत्रं प्राप्य ते पुण्यनगरे समागताः। बाबासाहेबदीक्षित-महोदयानां गृहे आवयोर्वार्त्तालापः समभवत्। तस्यां वार्तायां मया आप्टेमहोदयानामिच्छा बोधिता। श्रुत्वैव तेषां नेत्रे सजले अभूताम्। मया सर्वमेव बोधितम् इदं निर्णीतं यत् पाण्डिचेर्यां स्वनिर्धारितं कार्यं समाप्य ते वर्धानगरे आगच्छेयुः तदनुसारमेव ते वर्धानगरे समागताः।

गुरुभिर्गोलवलकरमहोदयैस्सह मया पूर्वमेव वार्ता कृताऽऽसीत्। तेभ्योप्यानन्दः स्वाभाविकः। श्रीदादाराव-परमार्थमहोदयाः पुनः संघकार्ये प्रचारकत्वे नियोजिताः पुनश्च दुर्दैवात्ते रुग्णाः संजाताः देहल्यां च तेषां मृत्युरभवत्। एतस्याः घटनायाः वर्णनमश्रावयत्। परमन्ते ते अवदन् अस्मिन् दुःखेऽप्येकं समाधानमस्ति। श्रीदादारावपरमार्थ-महोदयाः स्वप्रतिभयैव संघे प्रविष्टाः स्वयंसेवकस्य रूपे एव पंचत्वं प्राप्ता इति कियान् भाग्यस्य विषयः।

**ब्रह्मपुरी, जयपुरम्**

❑ डॉ. ओमप्रकाश पारीक

# उपनिषदाधारितजीवनदृष्ट्या विश्वकल्याणम्

उपनिषद्साहित्ये अभिव्यक्ता भारतीयऋषीणां प्रज्ञा मानवजीवनमुपकर्तुं प्रकाशस्तम्भमिव प्रेरणास्पदा वर्तते। एतेषूपलब्धाः विचाराः सार्वभौमिकाः सार्वकालिकाः सार्वजनीनाश्च अत एव विश्वकल्याणकारकाः। वस्तुतः सर्वयोनिषु मनुष्यजन्म दुर्लभतमम्, अन्याः योनयः केवला भोगयोनय एव किन्तु मनुष्ययोनिर्भोगयोनिः कर्मयोनिश्च। मनुष्यः भोगेन सह स्वकर्मभिः आत्मोन्नतिमपि कर्तुं शक्नोति।

उपनिषत्सु एतादृशाः जीवनव्यवहारोपायाः प्रतिपादिता येषामाचरणेन मनुष्यजीवनं सार्थकत्वं प्राप्नोति। सार्वभौमिकेनसार्वकालिकेन उपनिषज्ज्ञानेन विश्वकल्याण.मवश्यमेव भवितुमर्हति। उपनिषज्ज्ञानं सीमाबद्धं नास्ति अपितु सर्वव्यापकं वर्तते। वर्तमानकाले सम्पूर्णे विश्वे स्वार्थनिष्ठया प्रवर्तमानाः दुराचाराः अनाचाराश्च प्रचलिताः। मनुष्यः विवेकशून्यः पशुवत् भोगमाचरति, तेन स्वयमपि पीडितो भवति अन्येषां प्राणिनां कृतेऽपि पीडामुत्पादयति। उपनिषत्सु त्यागेन सह भोगः, अनासक्तिपूर्वकं परद्रव्यलोभराहित्यस्य भावना प्रतिपादिता। अनया भावनया प्रेरितः मनुष्यः भोगेन साकं स्वयमपि आनन्दमनुभवितुं शक्नोति अन्येभ्यः प्राणिभ्योऽपि आनन्दमेव विस्तारयितुं प्रभवति –

**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥**

(ईशोपनिषद् – 1/1)

एतादृशी भावना अधुना वैश्विककल्याणाय महदुपादेया वर्तते।

उपनिषत्सु ज्ञानकर्मणोर्मध्ये औचित्यपूर्णं सामञ्जस्यं निबद्धम्। ज्ञानं विद्यया कर्म च अविद्यया तत्र उल्लिखितम्। ये जनाः केवलं ज्ञाने एव रताः तेऽपि न प्रशस्याः अपि च ये जनाः केवलं भौतिकसमृद्ध्यर्थम् कर्मणि एव संलग्नाः तेऽपि न प्रशस्याः। अत एव ईशोपनिषदि प्रतिपादितम् –

**अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।**
**ततो भूय इव ते तमो ये उ विद्यायां रताः॥**

(ईशो.– 1/9)

अतः ज्ञानकर्मणोर्मध्ये औचित्यपूर्ण विवेकः कर्तव्यः। अनेन विवेकेन कर्मणामनुष्ठाने मृत्युं अर्थात् संसारसागरं तीर्त्वा ज्ञानानुष्ठानेन मनुष्यः परं पुरुषार्थं मोक्षमधिगन्तुं शक्नोति।

**विद्यां चाऽविद्यां च यस्तद् वेदोभयं सह।**
**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥**

(ईशो – 1/11)

अतः ज्ञानसंवलितानि कर्माणि आचरितव्यानि, एतादृशैः कर्मभिः बन्धनं न भवति। अपरेषां प्राणिनां कृते काचिद् पीडाऽपि न भविष्यति। अतः एतादृश्या सरण्या विश्वोपकरणं निश्चितमेव। अनया रीत्या अस्मिन् संसारे कर्मणां समाचरणेन शतवर्षं यावत् जीवनस्य इच्छा कर्तव्याः –

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।**

(ईशो – 1/2)

उत्तमकर्माणि विश्वे प्रचलन्ति तर्हि विश्व-कल्याणमवश्यमेव साधितं स्यात्।

उपनिषत्सु सर्वेषु प्राणिषु एकात्मभावस्य महत्ता प्रकटिता। ''इदन्न मम'' एतादृश्यां ममत्वरहितायां भवनायां मनुष्यः सर्वेषु प्राणिषु-''आत्मवत् सर्वभूतेषु'' सिद्धान्तस्यानुसरणस्य प्रेरणां प्राप्नोति। अनेन चिन्तनेन सर्वेषां जनानां शोकमोहादयः विनष्टाः भवितुं शक्यन्ते।

**यस्मिन् सर्वाणि भूतानि आत्मेवाभूद्विजानतः।**
**तत्र को मोहः कः शोकः एकत्वमनुपश्यतः॥**

(ईशो 1/7)

एवं एकात्मत्वनुपश्यन् मनुष्यः यदि कस्यापि पीडां

पश्यति तर्हि साहाय्यं कर्तुं प्रयतते। आवश्यकताऽऽपन्नस्य जनस्य कृते दानं कर्तुं प्रेरितः भवति। उपनिषद्साहित्ये दानस्य भावना-उपनिबद्धा। अद्य विश्वे केवलं आदानस्येव निष्ठा इच्छा च सर्वेषु दृश्यते यदि आदानस्य स्थाने मनुष्येषु दानस्य भावना स्यात्तर्हि पीडितानां, आवश्यकताऽऽपन्नानां जनानाम् आवश्यकतानां पूर्तिस्तु भविष्यति एव अपितु अनया भावनया सर्वेषु परस्परं सौमनस्यस्य, सामञ्जस्यापि च व्यवहारस्य विस्तारः स्यात्। अत एव उपनिषद् साहित्ये प्रतिपादितम् -

**श्रद्धया देयम्। अश्रद्धया देयम्। श्रिया देयम्**
**ह्रिया देयम्। भिया देयम् संविदा देयम्।**

(तैत्तिरीयोपनिषद्/ब्रह्मानन्दवल्ली/11)

उपनिषत्साहित्ये अस्माकं कृते मनसः निग्रहणस्य शुद्धिकरणस्य च महत्ता प्रतिपादिता। मनसि उत्पनैः भावैरेव मनुष्यस्य सुखानि दुःखानि चोत्पद्यन्ते। मन एव मनुष्यस्य बन्धमोक्षयोः कारणमस्ति। गीतायां भगवता श्रीकृष्णेनोक्तम् -

**असंशयं महाबाहो मनो दुर्निग्रहं चलम्।**
**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥**

(गीता - 6-35)

**मन एव मनुष्याणां कारणं बन्धमोक्षयोः।**

(अमृतबिन्दूपनिषद् 6-34)

उपनिषत्सु ओंकारस्य महिमा प्रतिपादितो येन मनसः स्थिरीकरणं शुद्धिकरणं च भवति। ओंकारस्योच्चस्वरेणोच्चारणेन मनसि स्थैर्यमायाति। अत एव उपनिषत्सु ओंकारस्य उद्गीथ इत्येवं संज्ञा वर्तते। उद्+गी+थ उद् (उच्चस्वरेण) गी (गायनम्) थ (मनसि स्थैर्यम्)

**''ओमित्येतदक्षरमुद्गीथम्''**

(छा. 3.1.1.8)

मनसः निर्माणमन्नेन भवति। अत एव आहारशुद्धौ मनुष्याणामवधानं भवेत्। आहारशुद्धौ सत्यामेव मनसः शुद्धिरपि भवति। मनुष्यस्य जीवने अन्नस्योपार्जनं आहारे च तस्योपयोगः सम्यक्तया सात्विकतया स्यात्तर्हि मनसः सुस्थिरीकरणं देहे भविष्यति। मनसः सुस्थिरीकरणेन सर्वे व्यवहाराः समीचीनाः जायन्ते कर्तुं मनुष्यः प्रभवति। उपनिषत्सु प्रतिपादितं वर्तते -

**अन्नाद्वै प्रजाः प्रजायन्ते। या काश्च पृथिवीं श्रिताः**
**अथो अन्नेनैव जीवन्ति**
**अथैनदपि यन्त्यन्ततः। अन्नँ हि भूतानां ज्येष्ठम्।**
**तस्मात् सर्वौषधमुच्यते।**

(तैत्तिरीयोपनिषद् 2/2/1)

अन्नस्य उपनिषदुक्तं वैशिष्ट्यं विश्वे सर्वैरवगन्तव्यम् यतो हि अधुना सर्वत्र अन्नदोषाः दृश्यन्ते तेन च मानसिक- दोषाः तेभ्यश्च आचारदोषाः अनाचाराः अत्याचाराः दुराचाराश्च प्रवर्तमानाः दृष्टिपथमायन्ति। अतएव विश्वकल्याणाय अन्नमुपनिषद्रीत्या अङ्गीकर्तव्यम्।

वर्तमानकाले वैश्विकपरिदृश्ये सार्थका शिक्षा न दृश्यते। उपनिषद्वाङ्मये शिक्षायां सार्थकत्वमुत्पादयितुं चिन्तनं विस्तारेण गम्भीरतया च विहितम्। अद्य शिक्षा आजीविकायाः एव साधनं न तु पुरुषार्थप्राप्तिक्षमा संस्कारक्षमा च। अत एव तैत्तिरीयोपनिषदि शिक्षा-वल्लयां स्वाध्याये ऋतस्य, सत्यस्य, तपसः, दमस्य, शमस्य, अतिथि-सेवायाः, मानवसेवायाः शाश्वत-गुणानामाधानस्य आवश्यकता प्रकटिता यथाहि -

**ऋतं च स्वाध्यायप्रवचने च। सत्यं च स्वाध्याय- प्रवचने च, तपश्च स्वाध्यायप्रवचने च। दमश्च स्वाध्यायप्रवचने च। शमश्च स्वाध्याय प्रवचने च। अतिथिश्च स्वाध्यायप्रवचने च। मानुषं च स्वाध्यायप्रवचने च।**

(तैत्तिरीयोपनिषद् शिक्षावल्ली/9)

एवमेव शिक्षाप्राप्त्यनन्तरं स्नातकस्य समाजे उत्कृष्टः आदर्शश्च व्यवहारः भवेत्। अतः शिक्षा आदर्श- व्यवहारस्योत्पादिका स्यात्। एतादृशं चिन्तनं

उपनिषत्सु कृतम् -

**''वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यान्मा प्रमदः। मातृदेवो भव। पितृदेवो भव। आचार्य देवो भव। अतिथि देवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि।**

(तैत्तिरीयोपनिषद/11)

शिक्षायाः कार्यमादर्शमानवस्य निर्माणमस्ति। उपनिषद् वाङ्मये विहितस्य शिक्षाचिन्तनस्य यदि वर्तमाने विश्वे शिक्षाव्यवस्थायां प्रयोगः स्यात्तर्हि विश्वस्य सर्वविधकल्याणं भविष्यति।

अधुना अर्थकामौ न धर्मसम्मतौ सर्वेऽपि ''सर्वे गुणाः काञ्चनमाश्रयन्ते'' मार्गस्यानुसरणं कुर्वन्ति। किन्तु धनं 'सुपथाराये' नियमानुसारेण उचितरीत्या जीवने समायाति चेत् कल्याणप्रदं भवति अन्यथा चेद् अनर्थकारकम् एव भवति। अतएव कठोपनिषदि प्रतिपादितं वर्तते -

**''न हि वित्तेन तर्पणीयो मनुष्यः''।**

(कठोपनिषद्/प्रथमवल्ली/27)

धनेन कदापि सन्तोषानुभवः न भवति अत एव धने एव निष्ठा आत्मकल्याणमार्गे बाधिका अस्ति। एवमेव धनसंग्रहे विविधोपायैः मनुष्यः प्रयत्नशीलः दृश्यते। स धनसंग्रहे औचित्य-अनौचित्युपायविषये विवेकशून्यः सन् कुत्सितमार्गे स्वात्मानं प्रवर्तयति। उपनिषद्वाङ्मयस्य एतादृश्या (न हि वित्तेन तर्पणीयो मनुष्यः) भावनया मनुष्यजीवने अर्थशुचिता समायाति। अनया च विश्वकल्याणं सम्भवति।

वस्तुतः कामनानां पूर्त्यर्थमेव जनः अर्थसंग्रहं विदधाति। अतः कामनापूर्तिः धर्मानुसारिणी भवेत् यतो हि एकस्याः कामनायाः पूर्त्यनन्तरम् अपरायाः कामा नायाः उद्भवः मनसि जायते। उचितोपायैः अर्थसंग्रहणेन सर्वासां कामनानां शान्तिर्न संभवति। मनुष्यः कामनानां दासत्वरूपेण पुनः अपरां कामनां शान्त्यर्थं प्रयतते। अस्याः दुश्रृंखलायाः विरामः कदापि न संभवति। केवलं उपनिषज्ज्ञानामृतेन भावनानां परिष्कारेण मनुष्यः उचितमार्गे कामनापूर्त्यर्थं धनसंग्रहे प्रवर्तमानः सन्तोषः कर्तुं शक्नोति। यथोक्तं मनुस्मृतौ-

**न जातु कामः कामानामुपभोगेन शाम्यति।**
**हविषा कृष्णवर्त्मेव भूय एवाऽभिवर्धते।।**

(मनुस्मृति 2-94)

यथा हविषान्नेन अग्नेः प्रवृद्धिरेव भवति न तु शान्तिः, तेनैव कामनानामुपभोगेन पुनः कामस्य शान्तिर्न भवति अपितु कामोपभोगं प्रति उत्कण्ठायाः तृष्णायाश्च प्रवृद्धिर्भवति। अत एव कामनानामुपभोगे अर्थसंग्रहणे च उपनिषद् दृष्टया एव मानवस्य प्रवृत्तिः स्यात्तर्हि विश्वकल्याणस्य प्राप्तिः संभवा।

उपनिषद्रीत्या आत्मालोचनेन मनुष्यस्य उत्तम-कर्मणि प्रवृत्तिर्भवति अनुचितकर्मेभ्यश्च निवृत्तिः। अत एव उपनिषत्साहित्ये स्वकर्मणां स्मरणेन कर्म-परिष्कारस्य महत्ता प्रतिपादिता -

**ऊँ क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर।**

(ईशोपनिषद् / 7)

एवं उपनिषत्साहित्ये निबद्धाः अमृतविचाराः यदि विश्वे ग्राह्याः भविष्यन्ति तर्हि सम्पूर्णे विश्वे सुख-शान्ति सन्तोषाभ्युदयस्य स्थापना भविष्यति। अत एव एतदर्थं विद्यालयेषु महाविद्यालयेषु-विश्वविद्यालयेषु उपनिषद्-प्रतिपादितस्य ज्ञानस्य आचरणस्य च पाठ्यक्रमे समावेशः भवेत्। एवमेव स्थाने-स्थाने उपनिषत्संस्कारकेन्द्राणां सर्वेषां मनुष्याणां कृते सञ्चालनं स्वेच्छया अथवा समाजकल्याणाय सर्वकारसहाय्येन च भवितव्यम्। अनया उपनिषद्सरण्या विश्वकल्याणं भारतस्य च पुनः 'विश्वगुरुः' इतस्मिन् पदे स्थापना भवितुं शक्यते।

**व्याख्याता ( संस्कृत )**
कॉलेज शिक्षा विभाग, राजस्थान सरकार

बालोपयोगिनी जीवनवृत्तमाला

# भारतभूमेः सुपुत्राः

❑ अविनाश शर्मा

**वैन्यं पृथुं हैहयमर्जुनं च शाकुन्तलेयं भरतं नलं च।**
**रामं च यो वै स्मरति प्रभाते तस्यार्थलाभो विजयश्च हस्ते।।**

वैन्यं, पृथुम्, हैहयमर्जुनम् शाकुन्तलेयं भरतम्, नलम् रामम् च यो वै प्रभाते स्मरति तस्यार्थलाभो हस्ते च विजयः (अस्ति)।

वैन्यो पृथुः-पृथुः संसारस्य आद्यः राजा मान्यते। वेनस्य राज्ञो वंशे एषः समुद्भूत आसीत् अतः अयं वैन्यः-इति कथ्यते। पृथुराजेन एव शतम् अश्वमेधयज्ञाः कृताः अन्तिमे यज्ञे इन्द्रेण विघ्नः कृतः किन्तु पृथुना स्वपराक्रमेण ते सर्वे विघ्नाः विनाशिताः। अस्यां पृथिव्यां विभिन्नप्रकाराणां धान्यानां निर्माणं कृत्वा तथा तस्यां अन्तर्गतानि यानि रत्नानि विद्यमानानि सन्ति तेषां आविष्कारं कृत्वा पृथुना इयं पृथ्वी वैभवसम्पन्ना, सुविभक्ता, पुरपत्तनशालिनी कृता।

**पृथुना प्रतिभक्ता च शोभिता च वसुन्धरा।**
**शस्यरत्नवती स्फीता पुरपत्तनशालिनी।।**

अतः एषा पृथ्वी पृथोः कन्या इति मन्यते। पुराणेषु पृथोः महिमा एतादृशो वर्णितोऽस्ति यत् यदा स पृथुनृपतिः सम्राडभूत् तदा तस्मै कुबेरः सुवर्णसिंहासनं, वायुदेवः रत्नमंडितं छत्रम्, इन्द्रः सुवर्णमुकुटं, यमः दण्डम्, विष्णुः चक्रम्, रुद्रः खड्गम्, विश्वकर्मा रथम्, सागरश्च शङ्खम् समर्पितवान्।

**हैहयार्जुनः** (सहस्रार्जुनः) - सहस्रार्जुनः महिष्मत्याः अधिपतिरासीत्। आहिमालयात् नर्मदापर्यन्तं सहस्रार्जुनस्य साम्राज्यस्य विस्तार आसीत्। स्वपराक्रमेण सहस्रार्जुनेन रावणोऽपि परास्तः। पुराणानुसारं सहस्रार्जुनस्य जन्म सहस्रजिद्वंशेऽभूत्। अस्य पितुर्नाम कृतवीर्यः आसीत्। जन्मत एव अस्य हस्तौ नास्ताम्। भगवतः दत्तात्रेयस्य उपासनया तेन सहस्र- हस्ताः लब्धाः। अतः अर्जुनः सहस्रार्जुन इति नाम्ना प्रख्यातोऽभूत्।

**बाणः पुत्रशतज्येष्ठो बलेरासीन्महात्मनः।**
**सहस्रबाहुर्वाद्येन ताण्डवेऽतोषयन्मृडम्।।**

श्रीमद्भागवते १०।६२।२

**शाकुन्तलेयो भरतः**- भरतो हस्तिनापुरस्य सम्राजो दुष्यन्तस्य विश्वामित्रस्य ऋषेश्च कन्यायाः शकुन्तलायाः पुत्र आसीत्। महाकविना कालिदासेन निजे विश्वविख्याते अभिज्ञानशाकुन्तलनाटके भरतस्य बाल्यावस्थाया वर्णनं कृतम् यत् एषः वीरबालकः सिंहस्य मुखं उद्घाट्य तस्य दन्तान् गणयति स्म। भरतेन गङ्गायास्तटे पञ्चपञ्चाशत् यमुनायाश्च तटे त्रयोविंशतिसंख्यकाः यज्ञाः कृता आसन्। अनेन दिग्विजयं कृत्वा किरातहूणान् यवनान्, पौण्ड्रान्, कङ्कान्, शकान्, म्लेच्छान् च संग्रामे हत्वा अस्य भारतवर्षस्य संरक्षणं कृतम्।

**किरातहूणान् यवनान् पौन्ड्रान् कङ्कान् खशाञ्छकान्।**
**अब्रह्मण्यनुपांश्चाहन् म्लेच्छान् दिग्विजयेऽखिलान्।।**

**नलः** - पुरा निषधाधिपतिश्चन्द्रवंशीयो नलो नाम राजा आसीत्। हंसमुखात् विदर्भेश्वरस्य भीमराजस्य कन्यां दमयन्तीं त्रिभुवनैकसुन्दरीमाकर्ण्य पुनस्तां स्वयंवर-विधिना उपयेमे। स्वभ्रात्रा पुष्करेण सह नलः द्यूतक्रीडनात् सर्वस्वमहारयत्। ततः स राज्यच्युतो दमयन्त्या सह वनं गतवान्। अथ कल्यावेशितचित्तोऽयं नलः सुप्तां दमयन्तीं निष्ठुरवत् परित्यज्य पलायाञ्चक्रे। दमयन्ती तु प्रबुद्ध्य बहु विलप्य च पथिकसार्थवाहेन सह मातामहीगृहं गतवती। नानाविधक्ले-शेभ्यः शीर्णदेहा सा मातृमह्यापि अविज्ञाता तद्भवने तस्थौ। अथ दमयन्तीपिता भीमनृपतिर्दमयन्त्या अन्वेषणाय दूतान् नियोजयामास। दूतास्तु चिह्नविशेषैर्दमयन्तीं परिज्ञाय भीमाय न्यवेदयन्। भीमस्तु तां स्वगृहमानयत्।

नलस्तु दमयन्तीं परित्यज्य गच्छन् दावानलमध्यगतं करकीटकं नागं विपदे रक्षितवान्। कर्कोटकस्तु नलं प्रत्युपकर्तुमिच्छन् शरीरस्थमस्य कलिं दृष्ट्वा कलिमेव भृशं सन्तापयामास। ततोऽसौ ऋतुपर्णस्य सारथ्ये नियुक्त आसीत्। अथ गच्छति काले दमयन्ती पितृगेहस्था नलान्वेषणाय ब्राह्मणान् संप्रेष्य कथञ्चित् ऋतुपर्णसारथिं नलत्वेनावगम्य पुनः स्वयम्बरमिषेण ससारथिं ऋतुपर्णं पितृवेश्मनि आनयामास। अत्र दमयन्ती पाकादिकौशलेन ऋतुपर्णसारथिं नलं विज्ञाय स्वसमीपमानयामास। अथ कलिपरित्यक्तेन नलेन स्वसौन्दर्ये गृहीते भैम्या सह मेलनं संजातम्। ततोऽयं निषधं स्वदेशमागम्य भ्रातरं पुष्करं पुनर्द्यूताय आहूय पराजित्य च तं पुनर्लब्धराज्यो दमयन्त्या सह ससुखमुवास।

**श्रीरामः** - आदिकाव्यस्य रामायणसद्ग्रन्थस्य नायको कोटि-कोटिहिन्दूनाम् आराध्यदेवो भारतीयसंस्कृते-र्मर्यादापुरुषोत्तमः सर्वश्रेष्ठो राजर्षिः युद्धवीरो दानवीरो दयावीरो धर्मवीरो महापुरुषः श्रीराम आसीत्। पितृवचनं परिपालयता तेन चतुर्दशवर्षपर्यन्तं वनवासजीवनं व्यतीतमासीत्। स रावणसदृशस्य त्रैलोक्यकण्टकस्य विध्वंसं कृत्वा समस्तं संसारमातङ्कात् विमुक्तं कृतवान्। 'रामराज्य' इति शब्दोऽस्माकं

सर्वासु प्रादेशिकभाषासु आदर्शराज्यस्य पर्यायोऽस्ति। श्रीरामस्य अद्भुतेन रम्येण चरित्रेण भारतस्य प्रत्येकं व्यक्तिमात्रं सुपरिचितमस्ति। अत: अस्मिन् संक्षिप्ते लेखे तस्य विनिवेदनस्य विस्तारो न कृत:।

वैन्य पृथु को हैहय अर्जुन को शकुन्तला के पुत्र भरत को नल को राम को जो प्रात:काल स्मरण करता है उसको धनलाभ होता है और उसके हाथ में सदा विजय रहती है।

**वैन्यपृथु:** – पृथु संसार का आद्य राजा माना जाता है। वेन राजा के वंश में यह उत्पन्न हुआ था। इसलिये वह वैन्य कहलाता है। पृथु राजा ने एक सौ अश्वमेध यज्ञ किये थे! अन्तिम यज्ञ में इन्द्र ने विघ्न किया किन्तु पृथु ने अपने पराक्रम से वे सारे विघ्न नष्ट कर दिये। इस पृथ्वी पर अन्यान्य प्रकार के धान्यों का निर्माण करके तथा जो उसके अन्दर रहने वाले रत्न विद्यमान हैं उनका आविष्कार करके पृथु ने इस पृथ्वी को वैभवसम्पन्न सुविभक्त तथा पुरी नगरियों वाली बनाया था इसलिये यह पृथ्वी–पृथु की कन्या मानी जाती है। पुराणों में पृथु की महिमा का ऐसा वर्णन है कि जब यह पृथु राजा सम्राट् हुआ तो उसको कुबेर ने स्वर्णसिंहासन, वायुदेव ने रत्नमंडित छत्र, इन्द्र ने स्वर्णमुकुट, यम ने दण्ड, विष्णु ने चक्र, रुद्र ने खड्ग, विश्वकर्मा ने रथ और सागर ने शंख समर्पित किया।

**हैहय अर्जुन** (सहस्रार्जुन) सहस्रार्जुन महिष्मती का राजा था। हिमालय से लेकर नर्मदा पर्यन्त सहस्रार्जुन के साम्राज्य का विस्तार था। अपने पराक्रम से सहस्रार्जुन ने रावण को भी परास्त किया था। पुराणों के अनुसार सहस्रार्जुन का जन्म सहस्रा जित् वंश में हुआ था। इसके पिता का नाम कृतवीर्य था। जन्म से ही इसके हाथ नहीं थे। भगवान् दत्तात्रेय की उपासना से उसने हजार हाथ प्राप्त किये इसलिये अर्जुन सहस्रार्जुन नाम से प्रख्यात था।

**शकुन्तला का भरत** – भरत हस्तिनापुर के सम्राट् दुष्यन्त का, विश्वामित्र ऋषि की कन्या शकुन्तला का पुत्र था। महाकवि कालिदास ने अपने विश्वविख्यात अभिज्ञान शाकुन्तल नाटक में भरत की बाल्यावस्था का वर्णन किया है कि वह वीरबालक सिंह के मुख को फाड़कर उसके दांतों को गिनता था। भरत ने गंगा के तट पर बचपन, यमुना के तटपर तेतीस यज्ञ किए थे। इसने दिग्विजय करके किरात हूण, यवन, कंक, शक और म्लेच्छों को संग्राम में हराकर इस भारत वर्ष की रक्षा की थी।

**नल:**– पूर्वकाल में निषधाधिपति चन्द्रवंशीय नल नाम का राजा था। हंस के मुख से भीमराज की कन्या दमयन्ती को त्रिभुवन में एक अद्वितीय सुन्दरी सुनकर स्वयंवर की विधि से उनके साथ विवाह किया। अपने भाई पुष्कर के साथ द्यूतक्रीडा में वह नल सर्वस्व हार गया। उसके बाद वह राज्यच्युत होकर दमयन्ती के साथ वन में गया। इसके बाद कलि के द्वारा आवेशित यह नल सोती हुई दमयन्ती को छोड़ कर भाग गया। दमयन्ती तो जगकर बहुत विलाप करके यात्री के साथ नानी के यहां गई। अनेक प्रकार के क्लेशों से दुर्बल देहवाली वह अपनी नानी के द्वारा भी न पहचानी हुई उस भवन में ठहरी। इसके पश्चात् दमयन्ती को ढूंढने के लिये भीमराज ने दूतों को भेजा। दूतों ने चिह्नों से दमयन्ती को पहचान कर भीम को बताया। भीम उसे अपने यहाँ ले आए।

नल ने तो दमयन्ती को छोड़कर जाते हुए दावानल के बीच में फँसे कर्कोटक नाग को विपत्ति से बचाया। कर्कोटक ने नल का प्रत्युपकार करने की इच्छा से उसके शरीर में बैठे हुए कलियुग को देखकर उसको अत्यधिक सन्ताप दिया। इसके बाद वह ऋतुपर्ण के सारथि नियुक्त हुए। इसके बाद समय जाने पर दमयन्ती पिता के घर पर से नल को ढूँढने के लिए ब्राह्मणों को भेजकर किसी तरह ऋतुपर्ण के सारथी को नल समझकर फिर से स्वयंवर के बहाने से सारथी सहित ऋतुपर्ण को उसके पिता के घर पर ले आये। वहाँ दमयन्ती ने भोजनादि के कौशल से ऋतुपर्ण के सारथी को नल जानकर अपने यहां ले आई। उसके बाद कलि के छोड़ने पर नल ने अपना सौंदर्य प्राप्त किया और दमयन्ती के साथ उसका मेल हो गया। इसके बाद यह (नल) अपने देश निषध में आकर भाई पुष्कर को द्यूत हेतु बुलाकर और उसे पराजित करके फिर से राज्य प्राप्त करके सुख से रहने लगे।

**श्रीराम:** – आदि काव्य रामायण सद्ग्रन्थ के नायक कोटि–कोटि हिन्दुओं के आराध्यदेव भारतीय संस्कृति के मर्यादा पुरुषोत्तम सर्वश्रेष्ठ राजर्षि, कर्मवीर, दानवीर, दयावीर, धर्मवीर, महापुरुष श्रीराम थे। पिता के वचन को पालन करते हुए उन्होंने 14 वर्ष पर्यन्त वनवास जीवन व्यतीत किया था। उन्होंने रावण जैसे त्रिलोकी के कण्टक का नाश करके समस्त संसार को आतंक से मुक्त किया था। ''रामराज्य'' वह शब्द हमारी सभी प्रादेशिक भाषाओं में आदर्श राज्य का पर्याय है। श्रीराम के अद्भुत् रम्य चरित्र से भारत का प्रत्येक व्यक्ति सुपरिचित है। अत: इस संक्षिप्त खेल में उसके विशेष विवरण का विस्तार नहीं किया है।

**किशनपोलबाजार:, जयपुरम्**

शोधपत्रम्

# महाकविकालिदासस्य आत्माभिव्यक्तिः

❑ डॉ. रामदत्त शर्मा, डी. लिट्

महाकवि-कालिदासस्य संदर्भे विश्वस्य विद्वांसः कदापि मतैक्यं नाऽवहन्। न तु देशकालयोर्विषये, न च जन्मवंशयोरपि सम्बन्धे ते कञ्चिदपि निर्णयं कर्त्तुम् अपारयन्। कविजीवनस्य तथ्यानि प्रामाणिकदृष्ट्या कोऽपि प्रस्तोतुं समर्थो नाभवत्। विविधानि मतानि प्रस्तावितानि, नैके तर्काश्च संतर्किताः, परं कापि दृष्टिः, मतं तर्कश्च विवादहीनो नैव वर्तते, अपितु सर्वे एव अनिर्णीताः विवादास्पदाः अतार्किकाश्च सन्ति।

वस्तुतः कालिदासनामा एक एव कविः भारतभूतले नाभवत्, अपितु इतिहासे नैके कालिदासाः विभिन्नरूपेषु विख्याताः सन्ति। राजतरंगिणीकारेण कल्हणेन दशमशताब्द्याः पूर्वमेव तथ्यमिदं स्वीकृतं यत् ''कालिदासत्रयी किमु।'' अर्थात् तत्कालीने समये केवलमेक एव कविः कालिदास-नाम्ना विख्यातो नासीत्, अपितु त्रयः कवयः एतन्नाम्ना प्रसिद्धिं प्राप्नुवन्। तत्पश्चादपि कालिदासाः सञ्जाताः। सप्तदश-शताब्द्याम् अपि कोऽपि कालिदासः कविरभूत्। यस्य रचनाः प्राप्नुवन्ति जनाः।

अत्र च पुनः प्रश्नोऽयं समुपतिष्ठति यत् तेन संस्कृतजगति उत्कृष्टं पदं प्राप्तं, विमलरचनाश्च प्रकटीकृताः स जन्मतः एव कालिदासनामधेयः आसीद् अथवा उपनामधारी। यतो हि साहित्यकारेषु उपनाम-धारणस्य परम्परा प्रचलितासीत्। यथा हि कविः कृष्णद्वैपायनः वेदव्यास नाम्ना विख्यातोऽभूत्। श्रीकण्ठश्च भवभूति-नाम्ना प्रसिद्धिं प्राप। एवं च अन्येऽपि बहवः कवयः मूलनाम्ना नैव विख्याताः। अपितु उपनाम्ना उपाधिनाम्ना वा परिचीयन्ते। दक्षिणभारतीयाः कवयः प्रायशः उपनाम्नैव विख्याताः सन्ति। भिक्षाटनकाव्यस्य प्रणेता श्रीगोकुलः स्वनाम्ना सर्वथाऽपरिचितः परं उत्प्रेक्षावल्लभ नाम्ना एव व्यवह्रियते।

राजतरंगिणीकारेण स्वकीये ग्रन्थे मातृगुप्तकवेश्चर्चा विहिता, यथाहि-

**नानादिगन्तराख्यातं गुणवत् सुलभं नृपम्।**
**तं कविर्मातृगुप्तस्य सर्वस्थानान्यसादयत्।।**

अस्मिन् ग्रन्थे मातृगुप्तस्य वर्णनं द्वितीये तरंगे 323 श्लोकांकपर्यन्तं समुपलभ्यते। राजतरंगिणीकारेण मातृगुप्तः काश्मीरनरेशरूपे कविरूपे च स्वीकृतः, प्रमाणितः। यदा काश्मीरे हूणानामाक्र-मणमभूत् तदा मातृगुप्तः पराजितीभूय मध्यप्रदेशमागत्य गुप्त-साम्राज्ये न्युषितुमारभे। श्री रघुनाथसिंहः अस्मिन् संदर्भे स्वमतं प्रस्तुवन् कथयति-

''कतिपये विद्वांसः मातृगुप्तमेव कालिदासं स्वीकुर्वन्ति, ते इदमपि मन्यन्ते यत् यस्य विक्रमादित्यस्य सभायां नव-रत्नानामुल्लेखः प्राप्यते स विक्रमादित्योपाधियुक्तः षष्ठशताब्द्यां राजा हर्ष आसीत्। एषु नवरत्नेषु एव एकतमः कविः कालिदासः अभूत्।''

डॉ. भाण्डारकरमहाभागानां तर्कोऽस्ति यत् कालिदासस्य मातृगुप्तस्य च शब्दार्थः एकः एवास्ति। कालिशब्दस्यार्थः 'माता' गुप्तशब्दस्य 'दास' इति। एवं कालिदास एव मातृगुप्तः प्रतीयते।

कल्हणकविना राजतरंगिण्यां कालिदासस्य कुत्रापि समुल्लेखो न विहितः। प्रवरसेनस्यानुरोधेन लिखितस्य कलिदासकृत-प्राकृतकाव्यस्य सेतुबंधस्यापि उल्लेखो न प्राप्यते। आचार्य-क्षेमेन्द्रेणापि औचित्यविचारचर्चायां मातृ-गुप्तस्य कवितानाम् उल्लेखो विहितः। डॉ. पीटर्सन-महोदयेन सम्पादितायां वल्लभदेवसुभाषितावल्यामपि मातृगुप्तः अलङ्कार-शास्त्रस्य नाट्यशास्त्रस्य च प्रणेतृरूपेणापि प्राप्यते। डॉ. दुयेरल्लेमहाभागानां मतमस्ति यत् विक्रमादित्यसंबंधिनी या पूर्वकथा कथ्यते सा हूणविजेतुः यशोवर्धननृपस्य प्रसंगेन संगच्छते। प्रोफेसर पाठकमहोदयोऽपि मतमिदं समर्थयति।

रघुवंशे रघुदिग्विजयवर्णनस्य प्रसंगे हूणसंदर्भ-संकेतो विद्यते। ते च हूणाः काश्मीरमधिक्रान्ताः वसन्ति स्म। कालिदासस्तस्मिन्नेव प्रसंगे केशरवर्णनं करोति यच्च केवलं भारते काश्मीरे प्रदेशे संजायते। समुद्रगुप्तेन मातृगुप्तस्योल्लेखः एवं कृतः-

**मातृगुप्तो जयति यः कविराजो न केवलम्।**
**काश्मीरराजोऽप्यभवत् सरस्वत्या प्रसाधितः।।**

(राजतरंगिणी)-497

भाषा-महाकवि-श्री जयशंकरप्रसादेन स्कन्दगुप्त-रूपके मातृगुप्तस्य वर्णनं विहितम्। मातृगुप्तः कुमारदासस्य मित्रमासीत्। स च सिंहलराजकुमार धातुसेननाम्ना विख्यातः आसीत्।

*अभिज्ञानशाकुन्तले नाटकेऽपि हिमालयचित्रं प्राप्यते। काश्मीरे अद्यापि या शिवपार्वती-विषयिणी किंवदन्ती प्रचलिता वर्तते सैव कालिदासरचनायां अमरत्वं प्राप्ता। अस्य महाकाव्यस्य अध्ययनकाले एवं प्रतीयते यदयं जनः शिमलायां, काश्मीरे, कुण्डस्थलेषु च विचरति, तत्रत्यां सुषमां विलोकयति। मेघदूते यक्षस्य या सुन्दरनिवासभूमिः अलका वर्णिता तत्प्रसंगेन हिमालय-शोभा एव प्रस्तुता। यक्षरूपेण कविः आत्मनिवेदनं प्रस्तौति। स्वविरहवेदनां प्रकटयति, स्वकीयनिवासभूमिं प्रति इंगितं च कुरुते।*

संस्कृतसाहित्यस्य प्रमाणान्यपि इदं स्वीकुर्वन्ति यत् कुमारदासः कालिदासस्य परममित्रम् आसीत्। कुमार-दासः कालिदासं सिंहलदेशागमनाय आमन्त्रितवान्। पण्डित-बलदेव-उपाध्यायस्तु स्वकीयग्रन्थे संस्कृत-साहित्येतिहासे एतावद्धि स्वीकरोति सप्रमाणं यत् कालिदासस्य निधनं अपि सिंहलदेशेऽभवत्। तस्य स्मारकं तत्र अधुनापि सुरक्षितम्। जानकीहरणमहा-काव्यस्य प्रणेता कुमारदासः कालिदासश्च समकालीनौ इति मन्यन्ते इतिहासविज्ञाः। एवं निश्चितरूपेण कथयितुं शक्यते यत् कालिदासः पूर्वं काश्मीरनरेशकुमारः मातृगुप्त एवासीत्। पश्चात् उज्जयिन्या महाकालीपूजोपा-सनया कालिदासनाम्ना प्रख्यातः अभूत्।

श्रीप्रसादेन स्कन्दगुप्तस्य पात्रं मातृगुप्त एव संस्कृत-साहित्यकविः कालिदास इति स्वीकृतः। राजतंरगिणी-कारेणापि मातृगुप्तः आदर्शनिष्ठः, राष्ट्रकविरूपः प्रस्तुतः अस्ति।

भारतीयसमालोचकाः अपि कालिदासं काश्मीर-निवासिनं मन्यन्ते। अस्य प्रमाणभूताः कवेर्ग्रन्था एव सन्ति। कुमारसम्भवमहाकाव्यस्य प्रारम्भस्तु हिमालय-वर्णनेनैव विद्यते।

रघुवंशमहाकव्ये प्रथमसर्गे महाराजदिलीपो गुरु-वशिष्ठस्य आश्रमं गच्छति। स आश्रमः काश्मीरस्थितः एव वर्णितः। रघुयात्राप्रसंगे रघुरपि अस्मिन् आश्रमे समागच्छत् विक्रमोर्वशीये नाटके पुरूरवसः उर्वश्याश्च मिलनं काश्मीरस्य गन्धमादनपर्वते संदर्शितम्। प्रियतमाया उर्वश्या वियोगाकुलः पुरुरवा तत्रैव तां अन्वेषयति। इदं मनोहरं वर्णनं कविना चतुर्थांके वर्णितम्। शाकुन्तलस्य सप्तमांके महर्षिकश्यप-स्याश्रमः कश्मीरे एव वर्णितः। एवं कालिदासस्य सर्वासु कृतिषु यथा तथा हिमालयवर्णनं काश्मीरसुषमा च विद्यते एव।

कालिदासम् उज्जयिनीनिवासिनं, बङ्गदेशवासिनं वा प्रमाणयतां तर्काः नैव युक्तिसंगताः। यदि कालिदासः काश्मीरीयो नाभविष्यत् तर्हि स्वग्रन्थत्रयस्य प्रारम्भे (कुमार-संभवे रघुवंशे मेघदूते च) हिमालयवर्णनेन श्रीगणेशं नाकरिष्यत्। काश्मीरे शैवमतस्य प्रचलनम् अत्यधिकं वर्तते स्म। कालिदासोऽपि स्वयं शैवः इति इतिहासज्ञाः निर्विवादं स्वीकुर्वन्ति। काश्मीरप्रदेशः परम्पराणां सांस्कृतिकभावनानां च गहन-मननेन स्पष्टीभवति यत् कालिदासस्य रचनासु तासां यत्र तत्र समुल्लेखनं सञ्जातम् एतस्मात् स काश्मीरनिवासीति सिद्ध्यति। यथाह नन्दिनीधेनुरक्षाप्रसंगे राज्ञः दिलीप-स्योपरि यः सिंहः आक्रामति स कालिदासेन 'भूतेश्वर-पार्श्ववर्ती' नाम्ना परिचीयते। सिंधुमालिनी-संज्ञकाः नद्यः शचीतीर्थ-सोमतीर्थ-ब्रह्मसरः प्रभृतीनि स्थानानि काश्मीरे एव प्राप्यन्ते। प्रकृति-सुषमा-परिपूर्णं स्थलमिदमधुनापि ऊर्णानिर्मित-वस्त्रेभ्यः प्रथितम्। एषा प्रसिद्धिः पुरापि तथैवासीत्। मालविकाग्निमित्रनाटके यदा मालविका-विवाहः संपद्यते तदा कौशेय-पत्रोर्ण-वस्त्रैः सा शृंगार्यते। पत्रोर्णवस्त्रं ऊर्णादुकूलं भवति। अद्यापि काश्मीरे विवाहकाले यदूर्णादुकूलं परिधीयते तत् लोकभाषायां तत्र 'पानवुर' इति कथ्यते।

केशरं काश्मीरप्रदेशे एव संजायते। अस्य प्रचुरवर्णनं कालिदासेन स्वकृतिषु विहितम् यच्च केशरवर्णनं कालिदासस्य पूर्ववर्तिभिः कविभिः कुत्रापि न हि विहितम्। कालिदासेन स्वग्रन्थेषु 'शालि'-शब्दस्य प्रयोगो बहुलतया कृतः। शब्दोऽयं काश्मीर-देशस्य मौलिकः। अधुनापि काश्मीर-निवासिनो जनाः तण्डुलधान्यं शालिशब्देन व्यवहरन्ति। कालिदासेन देवदारुवृक्षाणां यद् वर्णनं विहितं,

तत् एतावत् स्वाभाविकं सजीवं प्रामाणिकं च वर्तते यत् हिमालय-काश्मीरदेशाद् अपरिचितो जनः कोऽपि तादृशं वर्णनं कर्तुं न शक्नोति। एवं स्थिते निश्चीयते यत् कालिदासः काश्मीरनिवासी एव। किन्तु हूणाक्रमणवशात् स्वजन्मभूमिं परित्यज्य गुप्तसाम्राज्ये समागतः। यतो हि तदानीम् उत्तरभारते गुप्तसाम्राज्यमेव शक्तम् आसीत्। इतिहासोऽपि निर्दिशति यद् हूणानां प्रबलाक्रमणेन भारतं छिन्नभिन्नमभूत्, किन्तु गुप्तशासकैः आर्यावर्तस्य समस्त-नरेशाः पुनः संगठिताः, विजयपथं प्रति प्रस्थिताश्च।

कालिदासस्य यात्रावर्णनैः युद्धवर्णनैश्चानुभूयते यत् कविना प्रत्यक्षं दृष्टं किमु तत्र तत् नान्यथा सजीवं वर्णनं शक्यते। गुप्तवंशोत्तरनृपाश्रिततत्वं च कालिदासस्य इतिहासप्रमाणैर्नहि सिद्ध्यति। अन्येन केनापि राज्ञा एतावती दीर्घतमा यात्रा निरन्तरं संघर्षश्च न कृतः हूणैः सह। अद्यावधि वयं अस्मिन् निष्कर्षे समुपगताः यत् कालिदासः काश्मीरनिवासी, गुप्तवंशाश्रितः, काश्मीर-राजकुमारः मातृगुप्त एवासीत्।

कतिपयैर्विद्वद्भिरिदं विविधैः प्रमाणैः सत्यापयितुं प्रयतितमस्ति यत् कालिदासः स्वयं स्वप्रेयसीं प्राप्तुमसमर्थः सन् विरहाश्रूणि प्रावाहयत्। अत एव सर्वत्र तत्काव्येषु पुरुषाणामधीरता विलापाश्च दृश्यन्ते। न तावन्तो नारीणां पात्राणां माध्यमेन कविः हृदयोद्गारान् प्रकटयति यत्र तत्र। यथाहि अभिज्ञानशाकुन्तलनाटके अपमानिता तिरस्कृतापि सा अस्वीकृता शकुन्तला प्रियविरहे नैव विलपति। गर्भवेदनां दुःसहं लोकापवादं च सहन्ती सा धैर्यवती अवर्तत, अपरतो दुष्यन्तः पुरुषपात्रं शकुन्तलास्मृत्यां विकलीभवति, विलपति, अधीरता तस्य कविहृदयाभिव्यक्तिः एव। विरहिणः कालिदासस्य रचनासु एतस्मादेव करुणरसस्य चरमोत्कर्षः समुद्गतः। कालिदासकृतिषु करुणरसोऽपि रोदिति। एवमेव मालविकाग्निमित्रनाटके अग्निमित्रः राज्ञीं द्रष्टुं विकलीभवति। अधीरः सः कथयति :-

**'संहर्तुमधीरतया व्यवसितमिव मे तिरस्करिणीम्।'**

विह्वलीभवन् अग्निमित्रो मालविकायां तिरोहितायां सत्याम् अश्रूणि मुञ्चति, विलपति, विरहे तपति च। अत्र अग्निमित्रः नैव विलपति, अपितु तद् व्याजेन कविप्रणयो विकलीभूय अधीरतां प्रकटयति। विक्रमोर्वशीयनाटके-ऽपि पुरुरवा उर्वशीविरहे गन्धमादनपर्वते विलपन् विचरति, मूर्च्छति च अतएव सिद्ध्यति यत् कालिदासः- स्वयं विरही आसीत्।

रघुवंशमहाकाव्ये दिलीपः सन्ततिविरहे दुःखी भवति। सुदक्षिणया च सहितो वशिष्ठाश्रमं प्राप्य एकाकी एव गोसेवार्थं वनं प्रस्थितवान्। अस्मिन्नेव काव्ये अग्रे इन्दुमतीविरहे अजस्य विरहालापः कारुणिकं प्रसंगमुपस्थापयति सम्पूर्णकाव्ये अजविलापः सशक्तं कारुण्यवर्णनं स्वीक्रियते। अजः पुनः पुनः विलापप्रसंगे मृर्च्छति प्रियास्मृतिविह्वलः यथाहि -

**'विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरतां।'**

महाराजो दशरथोऽपि रामविरहे विलपति पञ्चत्वं प्राप्नोति। नरेशो रामः सीताविरहे दण्डकारण्यतः लङ्कापर्यन्तं विलपन् विचरति। उदात्तचरितस्य मर्यादापुरुषोत्तमस्य रामस्यैवं विलपनं कविहृदयस्था पुरुषपात्रस्याधीरता एव रचनाव्याजेन प्रस्फुटिता।

मेघदूतकाव्यं तु सम्पूर्णमेव पुरुषपात्रस्य रुदनमेव केवलम्। यथा -

**त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्,**
**आत्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।**
**अस्त्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे,**
**क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः।।**

अत्र कविहृदयेन स्फुटतया स्वीयवेदना प्रस्फुटिता। कवि-राजीवनं स्वप्रेयस्याः मिलनं नहि प्राप्तवान्। यक्षमाध्यमेन कविरालपति यत् न जाने जनाः विरहावस्थायां प्रेमप्रवाहस्य न्यूनतां कथं कल्पयन्ति। वस्तुतस्तु तदानीं अप्राप्ताभीप्सितं प्रति पिपासा तीव्रतया तापयति। विरहे तु प्रेमराशिरेकत्रितो भवति। यथा हि मेघदूते-

**''स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा**
**दिष्टे वस्तुन्युपचितरसाःप्रेमराशी भवन्ति।''**

(उत्तरमेघ 55)

मेघदूतस्य यक्षः विरहोन्मत्तः जड़चेतनज्ञानमपि विस्मरति। कविस्तत्र कथयति ''**कामार्त्ताः हि प्रकृति-**

**कृपणाश्चेतनाचेतनेषु।''** मेघदूतस्थो यक्षः स्वयं कालिदासः तत्र कवेरात्माभिव्यक्तिः प्रसृता वर्तते। अलकासौन्दर्यं कवि-प्रेयस्याः अनिन्द्यरूपत्वेन व्यञ्जितम्। कालिदासः स्वप्रणयवार्तां प्रकटयितुमपि नोत्सहते न च प्रेयस्याः नामोल्लेखनस्थित्यामेव स्वात्मानमुल्लासयितुं समर्थः। यक्षिणीविश्वासोपगमाय संदेशहरं केवलं गोत्रसंकेतमेव ज्ञापयति यक्षः। अहो लज्जा कुलीनस्य। एवं दिग्दर्शनं भवति यत्र यत्र कवेरात्मनः। नारीपात्राणां वेदनानभिज्ञः स कुत्रापि तां नैवोत्थापयति, न विकासयति। यतो हि स्वकीया एव वेदना इयती तीव्रा यत् अन्यस्य वेदनां प्रति विचारणाय अवकाशमपि न प्राप। कुमारसम्भवे पार्वतीतपस्यातः शिवः दासत्वम् अपि स्वीकर्तुं प्रस्तुतोऽभूत्। एवं इतिहासप्रसंगेषु यद्यपि तानि-तानि पुरुषपात्राणि न धैर्यहीनानि तथापि कालिदास-लेखनीचित्रितानि तानि अधीरतायाः शिखरारूढानि दरीदृश्यन्ते।

अपरतः नारी पात्राणि परमधैर्यमवलम्बितानि वेदनया अव्यवस्थानि प्रतीयन्ते। दुष्यन्तविरहे तेन अपमानितापि शकुन्तला नैव क्रन्दति। यद्यपि नितान्तमस्वाभाविक-मिदम्, किन्तु कविस्तु स्ववेदना-क्लिन्नः आसीत्, स तु शकुन्तला-लावण्यमेवापश्यत्, रूपपानमेवाकरोत्, व्यथितहृदयस्य स्पर्शन मन्वभविष्यत्।

कालिदासकृतिषु सर्वत्र नारीहृदयानि कुसुम कोमलान्यपि बज्रसाराणि प्रतीयन्ते शाकुन्तले, विक्रमोर्वशीये, मालविकाग्निमित्रे, रघुवंशे, मेघदूते च कुत्रापि नारीविलापो नैव दृग्गोचरो भवति, अपितु पुरुषपीडा एव यत्र तत्र आक्रन्दति। पतिगृहं शकुन्तलायाः प्रस्थानकाले वीतरागः कण्वोऽपि विह्वलो भवति किन्तु ममतामयी गौतमी कर्त्तव्यशिक्षामुपदिशन्ती प्रस्थानशीघ्रतायै प्रेरयति च। दुष्यन्तराजभवने स्वपुत्र्यास्तिरस्कारकाले अस्वीकृतिप्रसंगेऽपि गौतमी दुर्बलतां नांगीकरोति। मेघदूते यक्षिणो विरहा-वस्थायाः चित्रणं यक्षिणीमानसप्रतिवेदनं नहि वर्तते, अपितु यक्षमानसे कल्पना प्रसरति। रघुवंशे सुदक्षिणा कुत्रापि अधीरतां नाप्नोति। इन्दुमती, कैकेयी, गर्भगुर्वी सीता च प्रमाणभूताः कालिदासस्य नारीचित्रणाय। यत्र कुत्रापि नारीणामश्रूणि प्रसूतानि, तानि आनन्दाश्रूणि प्रेमाश्रूणि वा एव सन्ति।

एकमात्रं कुमारसम्भवस्य चतुर्थे सर्गे रतिविलापः अपवादस्वरूपः। स तु प्रसंगोचितः एव यतो हि पतिमृत्युसमानं किमस्ति अन्यद् दुःखं स्त्रियै, स च पुनः नारीसमक्षं स्यात् तर्हि कियद् दुःसहं भवति। अस्मादेव तत्र कविना रति विलापश्चित्रितः किन्तु चान्ते पुनर्मिलनस्य आशानुप्राणिता सा धैर्यमेवावलम्बते। रतिविलापः न विरहगीतं अपितु शोकगीतम्। ऐतिहासिकदृष्ट्या, पौराणिकसाक्ष्येण, सामाजिकपरम्परया आवश्यकमिद-मासीत् इति विलपनम्। अन्यथा तस्मिन्नेव काव्ये पार्वती कथं न विकलीभूता। सा तु शिवोपासितानि पुनः प्राप्त्याशया दृढसंकल्पा सती दुष्करतपस्यामाचरति। कालिदासस्य पुरुषपात्राणि मातृगुप्तस्य विरहवेदना-प्रतिफलानि। तानि च स्वीयप्रणयान्वेषणस्वरूपाण्येव काव्यरूपेऽवतरितानि। कालिदासस्यात्मकथानाम्नि ग्रन्थे कविना वर्णितं यत् मातृगुप्तः आजीवं अलकाविरहे करुणाश्रूणि व्यसृजत्। गुप्तवंशीयराज्ञां आश्रये न्यवसत्। गुप्तवंशस्य वैभवमयी स्वर्णिमसंस्कृतिः कालिदासस्य कृतिषु स्पष्टं चित्रिताऽस्ति। स्कन्दगुप्तस्य युद्धयात्राक्रमः रघुदिग्विजययात्रया साम्यं वहति। स्कन्दगुप्तस्य हूणविजयोपरान्ते यज्ञस्य योजनमपि रघुवंशवर्णनेन पूर्णतः संगच्छति।

एषु सर्वेषु एव तथ्येषु यदि वयं दृक्पातं कुर्मस्तर्हि निर्विवादमिदं सिद्ध्यति यत्-

1. कालिदासः मातृगुप्तश्च एका एव व्यक्तिरासीत्।
2. कालिदासः काश्मीरनिवासी अभूत्।
3. कालिदासस्य कृतिषु पुरुषपात्रचित्रणे स्वकीय-मानसदृशा चित्रिता वर्तते।

तथ्यानां तार्किक-विवेचनानन्तरं विषयेऽस्मिन् विदुषां मतैक्यमपेक्ष्यते, यस्मात् महत्वपूर्णमिदं तथ्यं सत्यस्तम्भे प्रस्थापितं भवेत्।

**प्लाट नं. 102,पोस्ट 16, सेक्टर- 24,**
**रोहिनी, देहली-85**

# मानवजीवने गृह्यसूत्राणां महत्वम्

❑ कैलाशचन्द्रबुनकरः

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।**
**ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु।।**

वेदाङ्गानां षड्-भागेषु विभजनं वर्तते। ते च भागाः शिक्षा-कल्प-व्याकरण-निरुक्त-ज्योतिषच्छन्दांसि इत्याख्यानि वर्तन्ते। एतेषु षट्सु भागेषु कल्पभागः वर्तते प्रयोगात्मकः। कल्पभागस्य श्रौतगृह्य-शुल्व-धर्म-प्रवरभेदात् पञ्च भागेषु विभक्तं साहित्यं मिलति। तत्र श्रौतभागे हविर्याग-सोमयागसूत्राणां वर्णनं मुख्यायते। अस्मिन् क्रमे आश्वलायन-कात्यायन-आपस्तम्ब-सत्याषाढ, भारद्वाजमानवबोधायन-लाट्यायन-वैतान-श्रौतसूत्राणि भवन्ति। येषु श्रौतागाराणां वेदविधानं चयनयागस्य च चितीनां निर्माणविधिः मिलति। शुल्बसूत्राणि रेखागणितस्य ज्यामितीनां त्रिकोणमितीनाञ्च प्राचीनतमं विवेचनं समुपस्थापयन्ति। धर्मसूत्राणि तु संस्काराणां सामाजिकव्यवहाराणां च विवेचनं प्रस्तुवन्ति। अस्मन् क्रमे गौतमधर्मसूत्रं सुप्रसिद्धम्। गृह्यसूत्राणि तु गृह्यकर्मणां सटीकं विवेचनं निर्दिशन्ति। यत्र गर्भाधानात् विवाहपर्यन्तं संस्काराणां विवेचनं प्राप्यते। लौकिक-मान्यतानुसारं संस्काराणां संख्या षोडश, प्रसिद्धा, परं गृह्यसूत्रेषु त्रयोदशसंस्काराणामेव चर्चा मिलति। आश्वालयनगृह्यसूत्रं तु केवलम् एकादशसंस्काराणामेव संख्यां निर्दिशति। गृह्यसूत्राणि अधिकृत्यैव विविध-संस्कारपद्धतीनां प्रचलनमभूत्।

**गृह्यसूत्रम्-**

गृह्यकर्माणि गृहस्थः स्वयं स्वभार्यया सह सम्पादयति। गृह्यसूत्रेषु लौकिकजीवनेन सम्बद्धानां क्रियाकलापानां महदभिरामरूपं लक्षितं भवति। वस्तुतः गृह्यसूत्रं भारतीयपारिवारिकजीवनस्य अत्यन्तं व्यवस्थितं स्वरूपमस्ति। गृह्यसूत्रेषु जीवनेन सम्बद्धानां दैनिक-पाक्षिक-वार्षिकयज्ञानां विवेचनं कृतम्। गृह्यसूत्रवर्णित-यज्ञानां स्वरूपं सामान्यतः किञ्चित् निश्चितं भवति। गृह्याग्निना यज्ञाग्निः प्रज्ज्वलितो भवति। तत्पश्चात् देवेभ्यः आहुतिप्रदानं क्रियते। गृह्यसूत्रेण सह सम्बद्धं सूत्रसाहित्यम् एकं विशिष्टं वाङ्मयमिदं धर्मसूत्रमिति नाम्ना प्रसिद्धं यत् भारतीयं प्राचीनतमं साधनमस्ति। अन्ते सूत्रसाहित्येन सम्बद्धमेकमन्यत् साहित्यमपि दृश्यते यत् यज्ञवेदिनिर्माण-स्य व्याख्यां करोति तथा ज्यामितिविद्यां प्रकाशयति। साहित्यमिदं शुल्बसूत्रम् इति नाम्ना अभिहितमस्ति। शुल्बस्य तात्पर्यं मापस्य रज्जुः इति। एतेषां चतुर्णां सम्मिलितं रूपं कल्पसूत्रमस्ति। यस्य सामान्योऽर्थः वैदिकसंस्थया सम्बद्धो धर्मयुक्तसूत्रग्रन्थोऽस्ति।

सम्प्रति उपलब्धगृह्यसूत्रानुसारं सम्पूर्णजीवनवृत्तं व्यवस्थितरूपेण सञ्चालितं भवति। गृह्यसूत्रमिदं जीवनस्य वैज्ञानिकसूत्रमपि अस्ति। गृह्यसूत्रे गार्हस्थ्य-जीवनस्य धार्मिकानुष्ठानानां विचाराणां गृह्यज्ञानानाञ्च विवेचनं वरीवर्ति। येषु गर्भाधानात् मृत्युपर्यन्तं किम्बहुना मृत्योरनन्तरमपि क्रियमणानां संस्काराऽनुष्ठानविधीनां नियमनं बोभवीति। एवं पञ्चमहायज्ञसप्तपाकयज्ञादि-द्वाविंशतिसंस्काराणां गर्भाधानात् विवाहपर्यन्ताष्टादश-कायिकसंस्काराणां योगेन चत्वारिंशत् संस्कारैः इदं गृह्यसूत्रं स्वकीयमपूर्वं महत्त्व-मादधाति। तथाच भूतापसरणस्य रोगापशकुनस्योपशमनस्य गृहनिर्माण-पशुपालनस्य विषयः तदर्थज्ञानं च प्रयोजनम्। गृह्यसूत्रेषु षोडश-संस्काराणां पञ्चमहायज्ञानां सप्तपाकयज्ञानाम् अन्येषाञ्च गृह्यकर्मणां सविशेषं ज्ञानं प्राप्यते।

गृह्यसूत्राण्यपि कमप्येकं वेदामाश्रयन्ति तथापि हस्तादृते न खलु कश्चित् पुरुषः स्वक्रियानुष्ठाने समर्थो भवति एवमेव कल्पस्य हस्तस्थानीयेन गृह्यसूत्रेण विना यथार्थकस्य वेदस्य क्रियानुष्ठानं न सम्भवति। वर्णितगृह्यसूत्रे पाकयज्ञानां संस्काराणामानुषंगिकाणां च लौकिकानामु-

पकारिणां कर्मणामुपदेशः। गृह्यसूत्रं स्मार्तगन्थ इत्युच्यते। गृह्याग्नौ सम्पन्नाः संस्काराः प्रतिदिनं धार्मिकक्रियाभिः सम्बन्धिताः भवन्ति तथा गृहस्थकर्मणां विवेचनकारणतः द्वितीयश्रृंखला गृह्यसूत्रमुच्यते। तत्र वेदगतशाखागतभेदात् स्वाभाविकगृह्यसूत्राणां संख्या पञ्चदश वर्तते।

**1. ऋग्वेदस्य गृह्यसूत्रम्** - 1. आश्वलायनगृह्यसूत्रम्- 2. शांखायनगृह्यसूत्रम् 3. कौषीतकगृह्यसूत्रम्।

**2. शुक्लयजुर्वेदस्य गृह्यसूत्रम्** - 1. पारस्करगृह्यसूत्रम्।

**3. कृष्णयजुर्वेदस्य गृह्यसूत्रम्** - 1. बौधायनगृह्यसूत्रम्, 2. आपस्तम्बगृह्यसूत्रम्, 3. भारद्वाजगृह्यसूत्रम्, 4. हिरण्य-केशीगृह्यसूत्रम्, 5. मानवगृह्यसूत्रम्, 6. काठगृह्यसूत्रम् 7. वाराहगृह्यसूत्रम्।

**4. सामवेदस्य गृह्यसूत्रम्** - 1. गोभिलगृह्यसूत्रम्, 2. खादिरगृह्यसूत्रम्, 3. जैमिनीगृह्यसूत्रम्।

**5. अथर्ववेदस्य गृह्यसूत्रम्** - 1. कौशिकगृह्यसूत्रम्।

**गृह्यसूत्राणां महत्त्वम्-**

ब्राह्मण-आरण्यकग्रन्थेषु च यज्ञ-यागादीनां विधानमस्ति। धार्मिकक्रियाणामुल्लेखोऽव्यवस्थित-असूत्रितश्चासीत्। गृह्यसूत्रेषु तासां स्वरूपं व्यवस्थितरूपेण प्रस्तुतम्। भारतस्य अतीतस्य समुज्जवला संस्कृतिः यदि दृष्टा तर्हि धार्मिकसूत्राणाम् अध्ययनमपेक्षितम् यतोहि जीवनस्य परमं लक्ष्यं मोक्षोऽस्ति। तत्प्राप्तिसाधनभूतानां संस्काराणां यज्ञानांच उल्लेखः एतस्मिन् साहित्ये मिलति। गृह्यसूत्राणां महत्तायाः विषये डॉ. विटरनित्सोऽलिखत्-लघु-लघुपुस्तकेषु प्राचीनभारतीयानां जीवनं पूर्णतया अङ्कितमस्ति। प्रतीयते यत् वयं तस्य युगस्य प्रत्यक्षदर्शनं कुर्मः। एतानि गृह्यसूत्राणि कल्पसूत्राणि च प्राचीन-भारतस्य वैयक्तिक-सामाजिक-लौकिकजीवनस्य यथार्थचित्रणं प्रस्तुवन्ति। एतानि सूत्राणि व्याख्याने सशक्तानि। यानि मन्त्राणामुचितविनियोगमपि कथयन्ति।

यज्ञेषु संस्कारेषु च स्थले स्थले वेदमन्त्रप्रयोगेण वेदमन्त्राणाम् अर्थोऽपि स्पष्टीकृतो दृश्यते। वेदानां संहितासु यजुषां ऋचां च यज्ञे स्थापनायाः मुख्यम् उद्देश्यं प्रतिभाति। एषु गृह्यसूत्रेषु मुख्यरूपेण द्वयोः ब्रह्मचर्य-गृह्यस्थाश्रमयोः विधानमस्ति। एतयोः वर्णनम् अन्यत्र दुर्लभमेव। यद्यपि कतिपयेषां गृह्यसूत्राणाम् एतद् वैशिष्ट्यमस्ति यत् तानि स्थानीयपरम्पराभिः रञ्जितानि सन्ति। अस्मिन् विषये डॉ. विण्टरनित्समहोदयस्य कथनं समीचीनमेव प्रतीयते, यद्यपि एतानि गृह्यसूत्राणि साहित्यिकरचनारूपेण अतिमहत्त्व-पूर्णानि न सन्ति। तथापि एतेभ्यः प्राचीनभारतीयजीवने गम्भीरा अन्तदृष्टिः प्राप्तुं शक्या। एतानि वस्तुतः नृवंशविद्यायाः अध्येतृभ्यः वास्तविकसम्पत्तिरूपाणि सन्ति। गृह्यसूत्राणि प्राचीन-भारतस्य जनजीवनस्य पत्रिकाभूतानि सन्ति। गृह्ययज्ञाः मानवं स्वकर्म प्रति प्रेरयन्ति। गृह्यसूत्रेषु वर्णितानां संस्काराणं रीतीनां च भारोपीयसंस्काराणां रीतिभिः यह अतीव महत्वं वरीवर्ति।

भाषाया आधारेण यूनानी, रोमन, ट्यूटानिकादि-जातिभिः भारतीय-आर्याणां मौलिकसम्बन्धं प्रमाणीकृतं तस्य पुष्टिः रीतिभिः संस्कारसमानताभिश्च जायते। भारतीयसंस्कृतौ समन्वयवादितास्ति। गृह्यसूत्रेषु समन्वयवादस्य स्थले स्थले दर्शनं भवति। सर्वत्र समन्वयस्य साम्राज्यं दृष्टिगोचरीभवति। गृह्यसूत्रेषु आर्यसभ्यता विशुद्धरूपेण चित्रिताऽस्ति। तपः भारतीयसंस्कृतेः मूलाधारोऽस्ति। तपसः महिम्ना सम्पूर्णं धार्मिकसाहित्यं परिपूर्णं दृश्यते। विना कठोरतपः सत्यप्रणयस्य उत्पत्तिः न भवितुं शक्नोति, जायते चेत् तर्हि कामजन्यो भवति। पति-पत्न्योः पितृपुत्रयोः तथा आचार्यशिष्ययोश्च सम्बन्धः आदर्शरूपेण गृह्यसूत्रेषु दृष्टिगोचरीभवति। पितुः हृदये पुत्रं प्रति अनन्यं प्रेम वर्तते। तस्य जन्मसमये तथा संस्काराणामवसरे पितुः अनुरागात्मकसम्बन्धस्य दर्शनं भवति। अतएव संक्षेपेण वक्तुं शक्यते यत् गृह्यसूत्राणि भारतीयसंस्कृतेः आधारभूतानि सन्ति।

**शोधार्थी, वेदविभागे**
**ज.रा.रा.रा.सं.वि.वि., मदाऊ, जयपुरम्**

# अनुसन्धानं तत्र सांख्यिक्याः प्रयोगस्य प्रयोजनानि च

❑ सोनल कुमार जैनः

मनुष्यः सर्वश्रेष्ठः प्राणी अस्ति। मनुष्यस्य अस्याः श्रेष्ठतायाः कारणं तस्य ज्ञानं विवेकः चिन्तन-शक्तिर्वा वर्तते। आत्मनः स्वकीयपर्यावरणस्य च सन्दर्भे जायमानानां घटनानां परिप्रेक्ष्ये चिन्तनशक्तेः क्षमता एव मानवस्य विलक्षणतायाः आधारो विद्यते। चिन्तन-शीलतायाः विवेकपूर्णव्यवहारस्य च अद्भुतं सामर्थ्यं समग्रसृष्टेः जीवेषु मनुष्ये एव विलसति।

अनुसन्धानं मानवीयप्रयासानां तस्य बौद्धिकपक्षस्य अन्यतममुदाहरणं वर्तते यस्य मभीयमेन सः आत्मनः स्वपर्यावरणस्य च विषये अवबोधं समीक्षात्मकविश्लेषणं सम्बन्धिनिरूपणं च करोति। मनुष्यः स्वकीयसमस्यानां समाधनाय परामर्श-अनुभव-निगमन-आगमन-तर्कादिविधी-नामुपयोगः प्राचीनकालात् करोत्येव, तथापि आधुनिकसन्दर्भे एकः नवीनतमो वैज्ञानिकश्च विधिः विकसितो जातः, येन विधिना प्राप्तं ज्ञानं समस्यासमाधानं च विश्वसनीये सत्यापनीये वस्तुनिष्ठे च भवतः। सः विधिःशोधविधिः अनुसन्धानविधिः वेति नाम्ना लोकविश्रुत इति।

अनुसन्धानपदस्य शाब्दिकोऽर्थः अस्ति अनु वारं वारं सन्धानमिति लक्ष्यवेधनम् अर्थात् कस्यचिदपि विषय-विशेषस्य सन्दर्भे गाम्भीर्येण गहनतया च क्रियमाणो विचार एव अनुसन्धानमिति। आंग्लभाषायाम् अनुसन्धानस्य कृते 'Research' इत पदस्य प्रयोगः क्रियते। पदमिदं शब्दद्वयस्य मेलनेन निष्पद्यते। Research=Re+Search. 'Re' इत्यस्य अर्थः अस्ति पुनः पुनः 'Search' इति पदस्य चार्थोऽस्ति अन्वेषणम्। कञ्चित् विषयम् अवलम्ब्य पौनःपुन्येन अन्वेषणमेव 'Research' अनुसन्धानमिति कथ्यते। अनुसन्धानक्रियायां शोधकर्ता विशिष्टं तथ्यं पौनःपुन्येन पश्यति, तस्य सन्दर्भे प्रदत्तान् एकत्रीकरोति, प्रदत्तानाम् आधारेण च निष्कर्षमधिगच्छति।

रेडमेनमहोदयानुसारं 'नवीनज्ञानस्य प्राप्तये व्यवस्थितः प्रयासः एव अनुसन्धानमिति।'[1] जार्ज जे. मुलेमहोदयानुसारम्- 'समस्यानां समाधनाय व्यवस्थित-रूपे बौद्धिकप्रयासेन वैज्ञानिकविधेः प्रयोगः अर्थस्थापन-मञ्चैव अनुसन्धानम्।[2]' ब्रूस डब्ल्यू. टकमैनमहोदयानुसारम्- 'अनुसन्धानम् एकः एतादृशः प्रयासोऽस्ति यस्य माध्यमेन प्रश्नानामुत्तराणि प्रदीयन्ते।[3]' एतासां परिभाषाणां परिप्रेक्ष्ये स्पष्टं भवति यत् अनुसन्धानस्य मुख्यो विषयो वैज्ञानिकविधिभिः विशिष्टप्रश्नानाम् उत्तरप्राप्तिः विशिष्टसमस्यानां समाधानप्राप्तिश्च अस्ति।[4] जहोदामहोदयानुसारम्-वैज्ञानिकानुसन्धानानां प्रति-प्रश्नात्मिका समास्यात्मिका वा भवति अतः एतादृशानां प्रश्नानां निरीक्षणमथवा प्रयोगात्मकविधिना वास्तविक-वातावरणे अध्ययनं विधेयं, येन अपेक्षिता सूचनाप्राप्तिः सम्भवा स्यादिति।[5]

**अनुसन्धानस्य प्रमुखाः विशेषताः-**

- अनुसन्धाने नवीनज्ञानस्य विकासः वृद्धिश्च भवतः।
- अनुसन्धानं विवेकपूर्णं च भवति।
- सामान्यनियमानां सिद्धान्तानां च प्रतिपादनम्।
- वैज्ञानिकी, व्यवस्थिता सुनियोजिता च प्रक्रिया।
- समस्यानां प्राक्कल्पनानिर्माणेन आनुभाविकं (Empirical) मात्रात्मकं (Quantitative) च अध्ययनं सुकरं भवति।
- अनुसन्धाने प्रदत्तानां विश्लेषणं वैज्ञानिकविधिना सांख्यिकीयपद्धत्या च क्रियते।
- अनुसन्धानेन प्राप्ते ज्ञाने नियमबद्धता, निरन्तरता एकता च भवन्ति।
- अनुसन्धानेन लब्धं ज्ञानं वैधं विश्वसनीयं च भवति।
- अनुसन्धानस्य प्रक्रियायां वैयक्तिकपक्ष-भावना-विचारादीनां किञ्चिदपि महत्त्वं न भवति।
- अनुसन्धानेन निष्कर्षाः नियमबद्धरूपेण प्रति-वेदनस्य नियमेन च प्रस्तूयन्ते।
- अनुसन्धाने सुनिश्चितानां विधीनां प्रविधीनां च उपयोगो भवति।

**अनुसन्धानस्य सोपानानि :-**

यथोक्तं पूर्वं यत् अनुसन्धानस्य प्रक्रिया व्यवस्थिता सुनियोजिता च भवति। अतः अनुसन्धानस्य प्रक्रियायाः सोपानान्यपि व्यवस्थितानि तर्कपूर्णानि नियमबद्धानि सुनियोजितानि च भवन्ति। यद्यपि अनुसन्धानस्य प्रत्यनुगुणं सोपानेषु न्यूनाधिकं परिवर्तनं भवितुमर्हति, तथापि सामान्यरूपेण अनुसन्धानस्य अधोमलिखितानि सोपानानि भवन्ति[6]-

- समस्याः चयनम् - सम्बद्धसाहित्यस्य सर्वेक्षणम्
- प्राक्कल्पनायाः निर्माणम् - शोधस्य रूपरेखा

- प्रदत्तानां समस्यानाम्-प्रदत्तानां व्यवस्थापनं विश्लेषणञ्च
- प्राक्कल्पनाया: सत्यापनम्-निष्कर्ष:सामान्यीकरणञ्च

कस्यापि प्रश्नस्य उत्तरप्राप्तेः कस्याश्चित् समस्यायाः समाधनप्राप्तेश्च बौद्धिककारणानां व्यावहारिककारणानां च आधारेण अनुसन्धानं द्विधा विभज्यते-मौलिकानुसन्धानं व्यवहृतानुसन्धानञ्चेति।

**मौलिकानुसन्धानम् (Fundamental Reasearch) :-**

यस्मिन्ननुसन्धाने निष्कर्षः केषाञ्चन विशिष्टवैज्ञानिक-नियमानां प्रतिपादनं भवति मौलिकानुसन्धानं कथ्यते। मौलिकानुसन्धाने नवीनसिद्धान्तानां प्रतिपादनं नवीनतथ्यानाम् अन्वेषणं च भवति। एण्ड्रीआसमहोदयानुसारं ''मूलभूतानुसन्धानस्य नवीनप्रचनानां निर्माणमस्ति।''[7] मौलिकानुसन्धानस्य प्रयोगात्मकम् ऐतिहासिकं दार्शनिकञ्चेति भेदात् त्रयो भेदाः भवन्ति।

**व्यवहृतानुसन्धानम् ( Applied Research ):-**

येन अनुसन्धानेन व्यावहारिकोपयोगस्य नियमा-नामन्वेषणं क्रियते, अथवा यस्मिन् अनुसन्धाने मौलिका-नुसन्धानानि व्यावहारिकरूपे परिवर्तयितुं प्रयासाः क्रियन्ते तत् व्यवहृतम् अनुसन्धानमिति कथ्यते।

अनुसन्धानस्य स्तरः -

अनुसन्धानस्य व्यवस्था चतुर्षु स्तरेषु क्रियते। एषु स्तरेषु च काठिन्यस्तरः क्रमशो वर्धते।

- प्रदत्तानां संकलनम् (Data Collection)
- आन्तरिकवैधता (Internal Validity)
- बाह्यवैधता (External Validity)
- सैद्धान्तिकानुसन्धानम् (Theoretical Research) इति।

**सांख्यिक्याः अर्थः -**

सांख्यिकी वैज्ञानिकविधेः सा शाखा विद्यते या गणनया मापनेन वा प्राप्तान् प्रदत्तान् विवेचयति। सांख्यिकी शब्दस्य कृते आंग्लभाषायां स्टेटिस्टिक्स (Statistics) इति शब्दः प्रयुज्यते। शब्दस्यास्य उत्पत्तिः लैटिनभाषायाः 'स्टेटस' (Status) शब्दात् इटेलियनभाषायाः 'स्टेटिस्टा' (Statista) शब्दात् वा सञ्जाता इति मन्यते। यूल कैण्डलमहाभागानुसारम् अस्य शब्दस्योत्पत्तिः स्टेटस (Status) शब्दात् सञ्जाता। (Statistic) शब्दस्य (State)शब्देन सह सम्बन्धत्वात् अभिज्ञायते यत् प्राचीनकाले अस्य शब्दस्य प्रयोगः राजनैतिककार्यसन्दर्भे क्रियते स्म। सांख्यिकी तदानीं राजनैतिकतन्त्रस्य अङ्गभूता आसीत्। जनगणना-जीवन-मरणानुपात-आय-व्ययादीनि राज्यस्य विवरणानि प्रदत्तैः व्यक्तीक्रियन्ते स्म। इमे प्रदत्ताः एव सांख्यिकी इति अभिधीयन्ते स्म।[8]

विंशतिशताब्द्यां कैश्चित् गणितज्ञैः वैज्ञानिकैश्च अस्याःउपयोगिताम् अनुभूय अस्याः क्षेत्रं स्वरूपं च विस्तारिते। सम्प्रति ज्ञानस्य प्रायशः सर्वेष्वपि क्षेत्रेषु अस्य प्रयोगः दरीदृश्यते।

**सांख्यिक्याः परिभाषा:-**

सांख्यिकी तादृशं विज्ञानमस्ति यत् प्रदत्तानां विश्लेषणेन व्यवस्थापनेन च सम्बद्धमस्ति।

फर्ग्युसन महोदयानुसारम् ''सांख्यिकी प्रयोगैः सर्वेक्षणैश्च प्राप्तान् प्रदत्तान् वर्गीकरोति विवृणोति व्याख्याति च।'' Statistics deals with collection, classification, description and interpretation of data obtained by conduct of surveys and Experiments.

टाटेमहोदयानुसारम् - ''सांख्यिकी अनुसन्धानस्य एकम् उपकरणमस्ति यच्च तथ्यानां संग्रहस्य व्याख्यायाश्च विधिभिः सम्बद्धमस्ति।'' Statistic as a tool in research deals with the methods of collecting and interpreting numerical facts.

**सांख्यिक्याः कार्याणि :-**

सांख्यिकी मानवजीवनस्य प्रत्येकं क्षेत्रे कार्यं करोति। कृषि-अर्थशास्त्र-वाणिज्य-स्वास्थ्य-चिकित्साशास्त्र-मनोविज्ञान-शिक्षादिषु अस्याः प्रयोगो बाहुल्येन दरीदृश्यते। अस्याः प्रमुखानि कार्याणि सन्ति-

- कस्याश्चित् समस्यायाः कस्यचित् परीक्षणस्य वा सन्दर्भे तथ्यानां वा संकलनम्।
- समस्या सम्बद्धानां प्रदत्तानां समयानुगुणं स्थानानुगुणं च स्थापनम्।
- विभिन्नानां प्रदत्तानां तथ्यानांसमस्यानांच तुलनात्मकमध्यय नम्।
- समस्यया सम्बद्धानां प्रदत्तानांवर्गीकरणं सारणीकरणञ्च।
- विभिन्नानां प्रदत्तानां तथ्यानां समस्यानां च मीये सम्बन्धस्थापनम्।
- समस्यया सम्बद्धानां प्रदत्तानां व्याख्यानं विश्लेषणं च विधाय निष्कर्षसम्पादनम्।
- निष्कर्षस्य सारल्येन सौगम्येन च प्रस्तुतीकरणम्।
- विभिन्न-प्रदत-तथ्य-समस्याभिः सह सम्बद्धानां प्राचीननियमानां परीक्षणं नूतननियमानां निर्माणञ्च।

**अनुसन्धाने सांख्यिक्याः प्रयोगः :-**

प्रायः सर्वेष्वपि देशेषु शोधकार्याणि प्रवर्तन्ते। शिक्षाक्षेत्रेऽपि गच्छता कालेन विधिप्रभृतिषु अपि परिवर्तनं नितराम् अपेक्ष्यते। किन्तु परिवर्तनमिदं कीदृशं कथंच स्यादिति अवगन्तुं शिक्षाक्षेत्रे विविधानि परीक्षणानि अनुसन्धानानि च सम्पाद्यन्ते। सांख्यिक्याः सहायतया एव एतेषां कार्याणां प्रामाणिकता विश्वसनीयता च परीक्ष्येते। अनया अनुसन्धानकार्याणां त्रुटिज्ञानेन सहैव तेषाम् उपयोगिताविषये भविष्यवाणी अपि विधीयते।

**अनुसन्धाने सांख्यिक्याः उपयोगिता:-**

- सांख्यिक्या वैज्ञानिकं सूक्ष्मं च वर्णनं कर्तुं शक्यते।
- निश्चितविधीनां प्रयोगेन परिणामानां सत्यापनमपि कर्तुं शक्यते।
- सांख्यिकीयविधिषु वस्तुनिष्ठा, शुद्धता संक्षिप्तता च भवन्ति।
- सांख्यिकीयविधिषु प्राप्ताः प्रदत्ताः संगतिपूर्णव्यवस्था-पनेन सार्थकाः कर्तुं शक्यन्ते।
- सांख्यिक्या प्राप्तानां निष्कर्षाणां भूतकालीनप्रदत्तैः सह तुलनाविधय भविष्यति काले जायमानानां परिवर्तनानां व्याख्यां कर्तुं शक्यते।
- प्रयोगात्मकविधिना प्राप्तांकानां निष्कर्षनिष्कासनं नियमीकरणं च सांख्यिक्याः प्रयोगेन एव विधीयते।
- अनुसन्धाने बहुसंख्याकाः प्रदत्ताः एकत्रीभवन्ति, तेषां प्रदत्तानां वर्गीकरणाय संकलनाय विश्लेषणाय च सांख्यिकी प्रयुज्यते।
- विभिन्नप्रयोज्येषु का कियती च विभिन्नता वर्तते, सर्वमेतत् सांख्यिक्या एव ज्ञायते।
- अयनीयविशेषतायाः न्यादर्शेषु वितरणं ज्ञातुं वर्णनात्मकसांख्यिक्याः प्रयोगो विधीयते।
- न्यादर्शेषु विद्यमानविशेषतायाःप्रतिनिधिमूल्यं ज्ञातुं सांख्यिक्याः मीयमान-मीयांक-बहुलांकप्रभृतयः विधयः प्रयुज्यन्ते।
- कस्मिंश्चिदपि न्यादर्शे कयोश्चित् द्वयोः चरणयोः परस्परं सम्बन्धस्य ज्ञानम् अनुसन्धाने आवश्यकं पुनश्च सांख्यिक्या एव शक्यं भवति।
- कतिपयेषु अवसरेषु कस्मिंश्चित् वितरणे प्राप्त-विचलनस्य स्रोतसां ज्ञानरूपम् अनुसन्धानम् अभिज्ञातुं विचलन-विश्लेषणस्य सांख्यिकीविधिः प्रयुज्यते।
- अनुसन्धाने कस्यचित् ज्ञातचरस्य साहाय्यबलेन अज्ञातचरस्य पूर्वानुमानमपि सांख्यिक्याः समाश्रयण-विश्लेषणविधिना एव सम्भूयते।
- कस्यचित् चरस्यद्वयोः समूहयोः प्राप्तभेदः वास्तविकः आकस्मिकः सांयोगिको वा चरित अस्य विवेचनं सांख्यिक्याः सार्थकपरीक्षणविधिना भवति।
- कश्चित् समूहः कस्याश्चित् विशेषतायाः सापेक्षः समांगी विषमांगी वा चास्ति अस्य ज्ञानं सांख्यिक्याः विचलन-पद्धत्या भवति।
- कस्यचिदपि व्यवसायस्यमहत्त्वं तदन्तर्गतं जायमानेषु नूतनशोधेषु परीक्षणेषु च आश्रितं भवति,अत एव शोधकर्तृणां कृते सांख्यिक्याः ज्ञानम् आवश्यकं वर्तते। येन शोधकार्येषु अनुसन्धानेषु वा गुणवत्ता जायेत।
- अद्यत्वे जायमानेषु प्रायशः सर्वेष्वपि शोधकार्येषु सांख्यिक्याः प्रयोगो भवति। शोधकर्तृणां कृते इदं सम्बद्धसाहित्यम् अवगन्तुं सांख्यिक्याः ज्ञानं नितराम् अपेक्ष्यते।

तदित्थम् अनुसन्धानकार्येषु सांख्यिक्याः सांख्यि-कीविधीनाञ्च अत्यन्तं महत्त्वं वर्तते। सांख्यिक्याः प्रयोगेन क्रियमाणेषु परीक्षणेषु वस्तुनिष्ठता बोधगम्यता च समागच्छतः। एवं प्रकारेण सांख्यिक्याः प्रयोगः अनुसन्धानकार्येषु वस्तुनिष्ठतां शुद्धतां सरलतां च जनयति। येन अनुसन्धानविधिषु सांख्यिक्याः प्रयोगस्य प्रयोजनानि स्पष्टानि भवन्तीति।


1. "Research is a systematized effort to gain new knowledge." *the romance of research*
2. The systematic and scholarly application of the scientific method interpreted in its broader sence, to the solution of problems.
3. Research is a systematic attempt to provide answer to question.
4. पारसनाथ राय, अनुसन्धान परिचय, पृष्ठ 20
5. Jahoda, Research Methods in Social Relations.
6. सरीन एवं सरीन, शैक्षिक अनुसन्धान विधियाँ
7. The prime quality of some basic research is its generating of new constructs, Andreas, B.C., Experimental Psychology, P. 215
8. सरीन एवं सरीन, शैक्षिक अनुसन्धान विधियाँ, पृष्ठ-282



**शोधछात्रः**

**राष्ट्रियसंस्कृतसंस्थानम् जयपुरपरिसरः, जयपुरम्**

# विद्यालयेषु सरलसंस्कृतप्रयोगः

❑ अभिनव उपाध्यायः

एतत्तु वयं जानीमः एव सर्वासामपि भाषाणां भेदद्वयं भवति-प्रौढ़ता सरलता चेति। सामान्यरूपेण या शास्त्रीयभाषा सा प्रौढा भवति, या तु व्यावहारिकी भाषा सा सरला एव। अतः भाषाव्यवहारे सरलसंस्कृतस्य प्रयोगः आवश्यकःइति। एवं संस्कृतं न्यूनाधिकरूपेण सर्वे छात्राः जानीयुः इति अभीष्टं चेत्, तदर्थं संस्कृतज्ञैः संस्कृताध्यापकैः लेखने, भाषणे, पाठने च अत्यन्तसरला सुबोधा च भाषा प्रयोक्तव्या। यथासम्भवं समस्तानां शब्दानां प्रयोगाः त्याज्याः। असमस्तपदेषु यथासम्भवं सन्धिर्न विधेयः। अद्य संस्कृतभाषा युगस्य अनुरूपा निर्मीयते। युगस्य इच्छानुसारं तस्याः सरलं स्वरूपं सम्मुखीक्रियेत। तत्र च कठिनानां प्रयोगाणामपसारणाय सरलीकरणायच उपायाः आश्रीयेरन्। साम्प्रतं तु विद्यालयादिशिक्षणसंस्थासु संस्कृतशिक्षणं संस्कृतभाषायां कर्तुमसमर्थाः भवन्ति। तेन च संस्कृतस्य स्तरोन्नयनपि नैव भवति। अतः तदर्थं संस्कृतसम्भाषणशीलत्वमपेक्ष्यते। विद्यालये संस्कृतवातावरणनिर्माणाय संस्कृतसम्भाषण-मत्यन्तमावश्यकम्। प्रायः सर्वेषु भारतीयेषु विश्व-विद्यालयेषु संस्कृताध्यापनं प्रान्तीय-भाषामाध्यमेन हिन्दीमाध्यमेन, आङ्गलभाषा-माध्यमेन वा भवति। एतादृश्यां स्थितौ स्नातकस्नातकोत्तर- कक्षापर्यन्तं संस्कृतं पठित्वाऽपि छात्राः संस्कृतेन सम्भाषणं कर्तुमसमर्थाः, कालान्तरे तेषु केचन संस्कृताध्यापक-सम्भाषणशीलानामभिवृद्ध्यर्थ संस्कृतस्य प्रचारार्थं च संस्कृतमाध्यमेन शिक्षणामनिवार्यं साधनमस्ति। संस्कृत-माध्यमेन शिक्षिताः छात्राः संस्कृतभाषायां प्रावीण्यं प्राप्य शास्त्राध्ययमोन्मुखाः भवेयुः।

संस्कृतभाषा सर्वासां भाषाणां जननी, सर्वासु भारतीयभाषासु अधिकप्रमाणेन संस्कृतशब्दाः सन्ति, अतः बाल्यादेव संस्कारवशाच्च संस्कृतश्रवणे जनानाम् अभिरुचिः वर्तते। तदर्थम् अस्माभिः मातृभाषायां प्रचुरतया प्रयुज्यमानान् संस्कृतप्रयोगान् स्वीकृत्यैव व्यवहारः करणीयः। यतः मातृभाषायां प्रयोगेनापि अर्थबोधे सारल्यं भवति। अत्यन्तमावश्यकानां सीमितानामेव शब्दानां वाक्यरचनायां च प्रयोगेन वाग्व्यवहारे सरलता भवति। पूर्वकाले वैदुष्यपूर्णभाषणं, प्रौढभाषणं पाण्डित्यस्य निकषः प्रमाणपत्रञ्च आसीत्। किन्तु यान्त्रिकयुगेऽस्मिन् तादृशः समयः आगतोऽस्ति, यत्र सरलसंस्कृतमेव पाण्डित्यस्य अपरः निकषः युगानुकूलं युगस्य आवश्यकता चास्ति। अतः सर्वैः संस्कृतविद्वद्भिः संस्कृतशिक्षकैः, स्वगृहे, विद्यालये सामाजिकसंस्थाने सम्भाषणे, वार्तालापे पाठ्यपुस्तकेषु, संस्कृतपत्रिकासु, आकाशवाण्याम्, दूरदर्शने, नाटकरूप-कादिकार्यक्रमेषु च सरलसंस्कृतस्य एवं प्रयोगः करणीयः यतो हि अनेन माध्यमेन जनाः संस्कृत-सम्पर्कमागच्छन्ति। अद्य तु संस्कृतसंस्थासु अपि प्रायः कार्याणि संस्कृतमाध्यमेन न प्रचलन्ति। अथ च यदा संस्कृताध्यापकाः महान्तो विद्वांसश्च न्यूतानिन्यूनं वेतनादिकं लभन्तेस्म तदा संस्कृतशास्त्राणां गहनाध्यापनं समभूत् तेषां पुत्राः प्रतिभान्विताश्च संस्कृतशास्त्रमिदं मुख्यतया अपठन्। सहैवान्यभाषाणां चाध्ययनं समकुर्वन्। अद्य तु संस्कृतशिक्षणसंस्थासु सर्वेऽध्यापकाः आधुनिकमहाविद्यालयीयाः विश्व-विद्यालयाध्यापकाः समानवेतनादिकं प्राप्नुवन्ति। संस्कृत-विद्यालयमहाविद्यालय, विश्वविद्यालयानां संख्याः प्रतिवर्षं वर्धन्ते नात्र संशयलेशः।

लघु-लघु सन्दर्भेष्वपि संस्कृतेरौन्नत्यं यथा प्रकाशितं भवेत् संस्कृतेः समुत्कर्षः प्रतिबिम्बितः यथा भवेत् यथा संसिद्धाः भवेम। तदर्थं पाठ्यपुस्तके विशेषश्रद्धाऽ-वधारणीया। सामान्यदिनचर्यादिबोधसमयेऽपि जागरूकै-र्भाव्यम्। तद्यथा दिनचर्यावर्णनसमये उषापानं तस्य लाभाः तत् चिकित्सकीयमहत्वम् उषापानविधिः उषादानस्य रहस्यं तस्य वैज्ञानिकविधानमित्यादिविषयान् सुष्ठु सप्रमाणं वर्णयेत् बोधयेद्वा। संस्कृतभाषायाः साहाय्यमन्तरा प्रादेशिक-भाषागतशब्दो न हि शक्यते ज्ञातुम्। तदर्थं शरणीकरणीयैव संस्कृतभाषाऽस्माभिः समैः। सर्वाः अपि एताः भाषाः

आर्यवंशोद्भवाः। सर्वासां आसां उद्गमः संस्कृतभाषाया एव। यदि एताभ्यः भाषाभ्यः संस्कृतभाषायाः शब्दाः बहिष्क्रियन्ते तर्हि तासां विलोपः स्यात्। इयत् परिमाणं विद्यते संस्कृतभाषायाः शब्दानां आसु भाषासु। इदानीम् एतासु सर्वासु भाषासु तथा तत्समशब्दानां तद्भवशब्दानां च आधिक्यं न तथा देशीयशब्दानाम्। इत्थं च संस्कृतभाषायाः व्यवहारिकी शब्दावली बृहत्तरभारतवर्षस्योपभाषासु सुप्रोता। अथ च प्राचीनपठनपाठनप्रणाल्याः पनरुज्जीवनं भवेत्। यतोहि संस्कृतौ तु विशालभावबोधकानि एव उपदेशवाक्यानि सर्वस्मिन् साहित्ये प्राप्यन्ते। न तु संकुचितभावबोधकानि, न वा व्यक्तिविशेषबोधकानि, न वा जातिविशेषसंस्थाविशेष-देशविशेषबोधकानि च वाक्यानि प्राप्यन्ते। इदमेव संस्कृतस्य वैशिष्ट्यम्। अत एव सर्वैः जनैः भाषेयं स्वायत्तीकरणीया एव, नात्र संशयः। पूर्वं विभिन्नशास्त्रेषु तलस्पर्शिपाण्डित्यं प्राप्तवन्तः पण्डिताः बाहुल्ये भवन्ति स्म। इदानीं सम्प्रतिपन्नानां विदुषां संख्या संक्षीयमाणा संदृश्यते। पूर्ववैभवप्राप्त्यर्थं, संस्कृतं पुनः प्रतिष्ठापयितुं च अस्माभिः एते अंशाः अवश्यं अवधेयाः भवन्ति। एते च लोपाः दूरीकरणीयाः एव भवन्ति।

अनुशीलितग्रन्थाः-


1. संस्कृतनिबन्धशकतम् - डॉ. कपिलदेव द्विवेदी - विश्वविद्यालय प्रकाशन वाराणासी।

2. सम्भाषणसन्देशः (मे मासस्य-2012) चमू कृष्णशास्त्री - संस्कृतभारती, बेंगलरू।

3. सगंक्रमनम् - चमू कृष्णशास्त्री - संस्कृत भारती झण्डेवाला, नई दिल्ली।

4. समीक्षा-सौरभम् - मिश्रोऽभिराजेन्द्रः, सम्पू. सं.वि.विद्यालय, वाराणसी।



**शोधच्छात्रः (शिक्षा विभागः)**

**रा.सं.सं. जयपुर परिसर**


---

# सूक्ति-सुधा

**❑ डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**(15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः)**

**धनधान्यादिवस्त्वर्थं कुटुम्बादिकृतेऽथवा।**
**वध, बन्धादिके प्राप्ते क्रोधस्त्याज्यो विवेकिभिः।।**

धन धान्यादि व्सतुओं के लिये अथवा कुटुम्ब आदि के लिये वध-बन्धन आदि प्राप्त होने पर विवेकीजनों को क्रोध छोडना चाहिये।

**क्रोधानलमहादाहः समुत्पन्नः शरीरिणाम्।**
**निर्दहति तपोवृत्तं धर्मं द्वैपायनादिवत्।।**

उत्पन्न हुआ क्रोधरूपी अग्नि का तीव्र दाह शरीरधारी प्राणियों के तप और चारित्ररूपी धर्म को द्वैपायन आदि मुनियों के समान नष्ट कर देता है।

**पूर्वं शोषयते गात्रं क्रोधाग्निः प्रकटीस्थितः।**
**पश्चादन्यानपि दद्यात् दुःख शोकादि दुर्गतिम्।।**

प्रकट हुई क्रोधाग्नि पहले शरीर को सुखाती है। पश्चाद् अन्य लोगों को भी यह क्रोधाग्नि दुःख शोक आदि दुर्गति को देती है।

**ताव त्तपो व्रतं ध्याने स्वस्थं चितं दयादिकं।**
**यावत्क्रोधो न जायेत तस्मात्कोपं त्यजेन्मुनिः।।**

जब तक क्रोध उत्पन्न नहीं होता, तब तक व्रत, ध्यान, स्वस्थ चित्त, दया आदि विद्यमान रहते हैं। इसलिये मुनि को क्रोध भाव छोड़ देना चाहिये।

**क्रोधशत्रुरतिदुःखदो नृणां, धर्मरत्नहरणे च तस्करः।**
**श्वभ्रमूल गृह प्रापण पान्थो, घातनीय इह शान्तिकृपाणैः।।**

क्रोधरूप शत्रु मनुष्यों को अति दुःख देने वाला है। धर्मरूपी रत्न को हरने वाला चोर है। नरक रूपी मूल गृह को प्राप्त कराने के लिये पथिक/मार्ग सहायक है। ऐसा यह क्रोध इस संसार में शान्तिरूपी तलवार के द्वारा घात करने योग्य है।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

# संस्कृत समाचारः




19/11/2017 रविवासरे संस्कृतभारतीजोधपुरप्रान्तजोधपुरजनपदस्य जनपदसम्मेलनम् फलौदीनगरे राजपुरोहितछात्रावासे अभवत्। सम्मेलने एका भव्या विज्ञानप्रदर्शिनी वस्तुप्रदर्शिनी चास्ताम् सम्मेलने मुख्यवक्ता श्रीमान् हुलासचन्दः क्षेत्रसङ्घटनमन्त्री संस्कृतभारती-राजस्थानम् आसीत्।

अध्यक्षतां कृतवान् फलौदीविधायकः श्रीमान्पब्बारामबिश्नोई-महोदयः। विशिष्टातिथयः लोहावटप्रधानः श्रीमान् भागीरथबेनीवालः श्रीअनिलकुमारः जैन उपखण्डअधिकारीफलौदी, नगरपालिका जेसीव्यासः अधिशाषीअभियन्ता नगरपालिकामण्डलम् प्रान्ताध्यक्ष प्रो. सत्यप्रकाशदुबे, श्रीमान् हरदयालमहोदयः विभागसहसंघचालकः जोधपुरविभागः सेवानिवृत-जिलाशिक्षाअधिकारी श्रीमान् प्यारेलाल-थानवीमहोदयः, श्रीमान्यागचन्दमहोदयः श्रीदिनेशशर्मा जेआरडीसमूहः महन्तदयानन्दगिरीमहाराजः श्रीशिवरतनपुरोहितः अध्यक्षः पुष्करणा-समाजः, आसन्। मञ्चसञ्चालनं सवाईसिंहराजपुरोहितः कृतवान्। सत्यप्रकाशदुबेमहोदयः लीलाधरशर्मा, वैद्यगोपालनारायणः, उद्बोधनं कृतवन्तः। श्रीमानारामः सांस्कृतिकसत्रस्य सञ्चालनं कृतवान्। सौभाग्यसिंहः सर्वेषां स्वागतं कृतवान्। चेतनपालीवाल-महोदयः सर्वेषां धन्यवादं कृतवान्। प्रदर्शिन्याः संयोजकः श्रवणकुमारबिश्नोई आसीत्।

साहित्यस्य प्रभारी श्रीजसराजमहोदयः श्रीजगदीशरंगामहोदयः, श्रीप्रेमारामः, आवासव्यवस्थाप्रमुखः श्री जसवन्तगिरीमहोदयः, पञ्जीयनप्रभारीश्रीडंगरसिंहः, ओमप्रकाशः मोतीलालः, प्रचारप्रमुखः श्रीपृथ्वीसिंहः यवनिकायाः पृष्ठे मुख्यसूत्रधाराः श्रीतगसिंहराजपुरोहितः महेशदाधीचः भुवनेशव्यासश्च आसन्। बहूनि संस्कृतकुटुम्बानि सम्मेलने आसन् संस्कृतग्रामबावडीः 200 जनाः सम्मिलिताः। शेरगढ-बालेसर-पीपाड-ओसिया-बाप-लोहावट-भोपालगढ़तहसीलेभ्यः प्रायः 70 स्थानेभ्यः 1500 संस्कृतानुरागिणः सम्मेलने सोत्साहं भागं गृहीतवन्तः। जोधपुरप्रान्तस्य प्रान्तकार्यकारिण्याः सर्वे जनाः उपस्थिताः आसन्।

सम्मेलने सहयोगार्थम् अन्येभ्यः जनपदेभ्यो बीकानेरतः श्रीताराचन्देरपस्वालः श्रीहरिशंकरसारस्वतः श्रीविरेन्द्र-मोहनः श्रीदाऊलालः नागौरतः भूदेवः भेरारामः, जैसलमेरतः श्रीलीलाधर-कुमावतः गगेन्द्रसिंहः ओमप्रकाशः बाडमेरतः तनुसिंहः बांसवाडातः फतेहचन्दः। जोधपुरमहा-नगराध्यक्षः प्रो. भानाराममहोदयः संभागसंयोजकः तुलसीरामश्च स्वगणेनसह 50 जना भागं गृहीतवन्तः। महानगरमन्त्री श्रीलक्ष्मणमहोदयः कार्यकर्तारः आगतवन्तः। JRD सम्मेलने समूह द्वारा उत्तमा भोजनव्यवस्था आसीत्।




3/12/2017 दिनाङ्के संस्कृतभारतीजोधपुरप्रान्तस्य श्रीगङ्गा-नगरस्य जनपदसम्मेलनम् चौधरीबल्लूरामगोदारा राजकीयकन्या-महाविद्यालये भव्यरूपेण सम्पन्नम् अभवत्। उद्घाटनसत्रे मुख्यवक्ता डॉ. तगसिंह-राजपुरोहितः आसीत् पं. तनसुखरामः अध्यक्षतां कृतवान् मुख्यातिथिः अतिरिक्त जिलाधीशः वीरेन्द्रवर्मा आसीत्। श्रीअमरचन्द-बोरड़ः जिलासंघचालकः श्रीप्रदीपघेरड़ विशिष्टातिथी आस्ताम् सारस्वतातिथिः प्राचार्य डॉ. प्रदीपमोदी आसीत्। प्रथमसत्रस्य सञ्चालनं डॉ. रामप्रकाश, डॉ. गुरुचरणौ कृतवन्तौ। मङ्गलाचरणं वागीश-विद्यापीठस्य बटवः कृतवन्तः। सूरतगढ़महाविद्यालयस्य छात्राः योगनृत्यं सांस्कृतिकप्रस्तुतिं प्रस्तुतवन्तः। लीलाधरशर्मा संस्कृतभारत्याः परिचयं कारितवान्। डॉ. श्यामलालः धन्यवादभाषणं कृतवान्। डॉ. बलवन्त-चौहानमहोदयः यातायातकोषव्यवस्थां कृतवान्। द्वितीयसत्रस्य अध्यक्षतां कृतवान् डॉ. सत्यव्रतवर्मा मुख्यातिथिः आसीत् श्रीसंजयमहीपालः अध्यक्षः नगरविकासन्यासः श्रीगङ्गानगरम्। विशिष्टातिथिः कैलाश-मेघवालः प्रदेशमन्त्री भाजपा। सारस्वतातिथयः आसन् पूज्यपादाः श्रीकल्याणस्वरुपब्रह्मचारिणः। सत्रस्य सञ्चालनं कृतवन्तौ राजेन्द्रनरेन्द्रौ। धन्यवादभाषणं कृतवती श्रीमती शशिगोयलः। गीनू वर्मा भोजनव्यवस्थां कृतवती। हनुमानगढवागीसविद्यापीठस्य प्राचार्यश्रीरामेश्वरः आचार्यः पङ्कजः वटवश्च उपस्थिताः आसन्। वस्तुप्रदर्शिन्याः संयोजनं कृतवान् राकेशजोशी। अतिथीनां स्वागतं कृतवन्तः सुभाषः अर्जुनः सुनीलबिश्नोई धनसीरामश्च। नूतनदायित्वानां घोषणां कृतवान् सहप्रान्तमन्त्री लीलाधरशर्मा। हनुमानगढजिला-संयोजकः श्रीरामेश्वरः नोहरतहसील संयोजकः सुनीलः भादरातहसील-संयोजकः रमनः विजयनगरतहसीलसंयोजकः नरेन्द्रः श्रीगङ्गानगर-तहसीलसंयोजकः रामप्रकाशपाराशरः सूरतगढतहसील संयोजकः डॉ. राजेन्द्रकम्बोजः श्रीगङ्गानगरजिलासहसंयोजकः श्रीगुरुचरणसिंहः श्रीगङ्गानगरमहानगरसंयोजिका गीनूवर्मा 1 सम्मेलने 350 जनाः भागं गृहीतवन्तः।

# भारतदेशस्य राष्ट्रभक्ताः

❑ अर्चना शर्मा

अस्माकं देशः भारतवर्षम्। यस्मिन् भूभागे जनस्य जन्म भवति तदेव तस्य जन्मभूमिः कथ्यते। मातृभूमिवात्सल्यं देशवासिजनानां सर्वोत्कृष्टं कर्त्तव्यमस्ति। यस्मिन् देशे तस्य जनजीवने च न प्रवहति देशभक्तिधारा, न संचारितं जन्मभूमिप्रेम, तत्र सामाजिकजीवनं शुष्कं गौरवरहितञ्च मन्यते। इदमेंवालक्ष्य अस्माकं देशे प्रत्यहं मातृभूमिस्तुतौ गीयते।

**वन्दे मातरम्!**
**सुजलां सुफलां मलयजशीतलाम्।**
**शस्य-श्यामलां मातरम्, वन्दे मातरम्।**

यस्मिन् देशे वयं जनिंलाभाभहे, यस्य क्रोडे बालक्रीडाश्च कुर्महे, यस्य अन्नैः संवर्धिताः यस्य प्राणवायुर्नो जीवनं सञ्चारयति। तस्य ऋणाद् वयं अनृणाः न स्याम। अतएव जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। पशुपतत्रिणोऽपि स्वजनिस्थानं स्निह्यन्ति। निजदेशस्य उन्नतिः स्वदेशप्रेम्णि एव अवलम्बते। स्व-लघुस्वार्थं संत्यज्य जीवने सत्याचरणेन देश उन्नतिं लभते। महात्मा-गान्धिनेहरू इत्यादयः स्व सम्पूर्ण जीवनं देशाय अजुह्वन्। अतस्ते महापुरुषाः बभूवुः। सप्तचत्वारिंशद् अधिकम् एकोनशततमे 1947 ईश्वीयवर्षे भारतदेशः स्वतन्त्रः अभवत्। आंग्लदेशीयाः पूर्वम् अत्र शासनम् अकुर्वन्। स्वाधीनतायै अनेकानि आन्दोलनानि अभवन्।

**1. स्वामी दयानन्द सरस्वती –**

महर्षिदयानन्दस्य जन्म 1824 **ख्रीस्ताब्दे** गुर्जरप्रान्तस्थ टंकारानगरे बभूव। ऐषां पितृचरणाः करसन तिवारी महाभागाः शिवभक्तब्राह्मणा आसन्। स्वपितृव्यस्य भगिन्याश्च मृत्युं दृष्ट्वा अस्य हृदि वैराग्यं प्रादुर्बभूव। एते सत्यं प्राप्तुं गृहात् निर्जग्मुः। एते वेदोक्तपरम्परां प्रतिष्ठापयितुमार्यसमाजं स्थापितवन्तः। वेदानां भाष्यं कृत्वा वेदानां माहात्म्यम् प्रदर्शितम्। एते समाजसुधारस्य अनेकानि कर्माणि चक्रुः। यथा अस्पृश्यानामुद्धारः स्त्रीशिक्षायाः प्रचारः गोशालानामनाथालयानाञ्च स्थापना गोरक्षा इत्यादीनि कार्याणि सन्ति। एते पूर्णब्रह्मचारिणः त्यागिनः, तपस्विनः देशभक्ताः, समाजसुधारकाः वेदानां अद्वितीया व्याख्यातारः निर्भीकाश्च सन्यासिनः आसन्।

**2. अरविन्द घोषः**

स्वतन्त्रप्राप्त्यर्थं बहवो जनाः हताः बहवों जना आहता बहवश्च नष्टसम्पत्तयः सञ्जाताः। तेषु खुदीरामबोस-प्रफुल्लचाकी-बारिन्द्र कुमारादिषु एकः प्रमुखक्रान्तिकारी महर्षि अरविन्द आसीत्। अयं स्वकीयं सम्पूर्णजीवनं स्वतन्त्रताप्राप्तये व्यतीतं चकार। आङ्गलसर्वकारे येऽधिकारिणः पथभ्रष्टाः, दुष्टाः, आसन्, तेषां कृते तु एते राष्ट्रभक्ताः प्रबलशत्रवः भवन्ति स्म। यथा श्रीकृष्णास्मरणात् कंसः भयाकुलः सन् कम्पमान इतस्ततो भ्रमति स्म तथैव स्वराज्य प्राप्तौ संलग्नानां क्रान्तिकारिणां ध्यानादेव आङ्गलाधिकारिणां हृदयं अश्वत्थपत्रमिव कम्पते स्म। धन्याः पूज्याः प्रातः स्मरणीयाश्च ते वीराः अरविन्दघोषश्च। येषां महत्प्रयत्नैः बीजारोपणैश्च यथासमयं स्वतन्त्रतेयं लब्धा।

**3. वीर सावरकरः –**

भारतदेशस्य स्वातन्त्र्यासाधनाय समरं कृतवतां क्रान्तिकारिणां पंक्तौ अग्रगण्यः आसीत् वीरविनायक-दामोदरसावरकरः। विनायक इति तस्य नाम आसीत्। दामोदर इति तस्य पितुः नाम सावरकर इति गोत्रस्य नाम च आस्ताम्। तस्य कार्यं दृष्ट्वा जनाः तस्य 'वीर' इति उपाधिं दत्तवन्तः महाराष्ट्रपान्ते नासिकजनपदे 'भगूर' इति नामकः एकः ग्रामः अस्ति। तत्र 1883 इमे ईशवीय वर्षे मईमास्य 28 तमे दिनाङ्के विनायकस्य जन्म अभवत्। तदानीम् अस्माकं देशे आङ्ग्लजनानां शासनम् आसीत्।

विनायकस्य नवमे वर्षे तस्य माता राधाबाई दिवङ्गता। अध्ययनार्थं विनायकः तस्य अग्रजः गणेशश्च नासिकनगरं गतवन्तौ। गणेशविनायकौ स्वमित्रैः सह नासिके स्वपाठशालायां मित्रमेला नाम्नीम् एकां संस्थाम् आरब्धवन्तौ। अनन्तरं विनायकः अध्ययनार्थ मुम्बईनगरं गतवान्। तत्र सः विद्याभ्यासं कुर्वन् एव समाचारपत्रेषु देशभक्तियुक्तान् लेखान् अपि लिखति स्म। स्वातन्त्र्यसाधनार्थं भारतीयानां प्रेरणायै उत्साहनिर्माणार्थं च तस्य जीवनचरितम् अपि स्फूर्तिप्रदया भाषया लिखितवान्। भारतीयेषु स्वातन्त्र्यभावना-जागरणाय सावरकरः ईशवीये 1857 तमे वर्षे सम्भूतस्य स्वातन्त्र्य संङ्ग्रामस्य समग्रं चरितं सप्रमाणं लिखितवान्। तस्य पुस्तकस्य नाम अपि ''1857 प्रथम स्वातन्त्रयसंग्राम'' आसीत्। भारत-देशेतिहासे षट्स्वर्णपत्राणि, इति नाम्ना सः एकं ग्रन्थं रचितवान्।

अस्मिन् ग्रन्थे भारतगौरववर्धकाः काश्चन घटनाः वर्णिताः। ईशवीये 1966 तमें वर्षे फरवरीमासस्य 26 दिनाङ्के सावरकरः इहलीलां परिसमाप्य दिवङ्गतः। वीरसावरकरः देशस्य स्वातन्त्र्यार्थम् एव जीवितवान्। तस्य प्राप्त्यनन्तरं तस्य रक्षणार्थं परितप्तवान्। अत एव तस्य नाम स्वातन्त्र्यावीरसावरकर इति। एकमुद्देश्यं लक्ष्यीकृत्य बहनां जनानाम् ऐक्यभावनया कार्यकरणमेव संहतिः संघः संगठनं वाऽभिधीयते। एकता मनुष्ये शक्तिमादधाति। एकतयैव देशः समाजो लोकश्च उन्नतिपथं प्राप्तनुवन्ति। यस्मिन् देशे समाजे वा एकताऽस्ति, स एव देशः सकललोकसम्माननीयो भवति। सततमस्माभिः प्राणार्पणेनापि मातृभूमेर्हितसम्पादनं विधेयम्। मातृभूमि-हितमेव राष्ट्रियहितं, भारतभूमेश्च गौरवमेव राष्ट्रगौरव-मित्यत्र नास्ति विभेदः। अतः एव मातृभूमिवात्सल्यं भारतस्य समृद्ध्यर्थं स्वातन्त्र्य-रक्षणार्थञ्च परमावश्यकम्।

**शोधछात्रा**
**राजस्थान विश्वविद्यालय, जयपुरम्**

नारी-स्तम्भः

# सम्राज्ञी श्वशुरे भव सम्राज्ञीश्वश्रवां भव

❑ डॉ. राजेश्वरी भट्ट

भारतीयपरिवारः अनेकेषां सम्बन्धानां महती संस्था वर्तते। अत्र परिवारस्य प्रसन्नताया मूलाधारः परिवार-सदस्येषु परस्परं वर्द्धमानाः प्रेमत्याग-करुणा-संयम-दयादयः सद्गुणाः सन्ति। सद्गुणैरेभिः समन्विताः सर्वे परिवारजनाः परस्परं भावयन्तः सुखेन जीवनं यापयन्ति। अस्याः प्रेयस्करी परम्पराया अनुबन्धनक्रमे संरक्षणे च नार्यो विशेषेण प्रशंसनीयाः सन्ति या विवाहानन्तरं श्वशुरालये नवपरिवेशं पविारञ्च प्राप्यापि पितृगृहे प्राप्तैः सुसंस्कारैर्गुरुजनान्प्रति श्रद्धया अनुजान् प्रति स्नेहेन परिजनान्प्रति दाक्षिण्येन व्यवहरन्त्यः परितुष्टैः श्वश्रूश्वशुरसम्बन्धिभिश्च गृहलक्ष्मी, अन्नपूर्णा, सम्राज्ञी इत्यादीनि सम्मानसूचकानि वचनानि श्रुत्वा कृतार्था भवन्ति-कथितञ्च-

सम्राज्ञी श्वशुरे भव सम्राज्ञीश्वश्रूवां भव
ननान्दरि च सम्राज्ञी सम्राज्ञी अधिदेवृषु।।

ऋग्वेद 10.75.46

आदिकाव्ये रामायणे ज्ञायते यत् दीर्घकालं यावद् अयोध्यायां संयुक्तपरिवारे सम्बन्धिभिः सह वासं विदधती रामपत्नी सीता आत्मनाऽऽचरितेन शीलेन सदाचारेण सच्चरित्रेण च परिवारजनान् प्रीणयन्ती सम्बन्धिनां कृते सम्माननीयाऽभवत्। सीतया सह रघुवंशीयानां औदार्यं पदे पदे रामायणे दर्शनीयमस्ति। भर्त्रा रामेण सह वनगमनाय कृतसंकल्पायाः सीताया दृढ़निश्चयेन श्वश्रूः कोसल्या शोकसंतप्ता भवति कथयति च यत् इयं सुकुमारी, तरुणी सुखभवने निवसती सीता कथं घोरे वने वासं करिष्यति। अत्र अयोध्यायां या मम पुत्रवधूः अनेकैर्व्यञ्जनैः समन्वितं षड्रसयुक्तं भोजनमकरोत् सैव विशाललोचना सीता कथं वन्यं भोजनं करिष्यति। कथितञ्च-

सा नूनं तरुणी श्यामा सुकुमारी सुखोचिता।
कथमुष्णं च शीतं च मैथिली विसहिष्यते।।

वा.रा. 2.61.4

परिवारे आपतितं दुःखं केवलं आपद्ग्रतस्य कृते भोग्यं न भवति अपितु तत् कष्टं निखिलस्य परिवारस्य कृते वेदनीयं भवति। रामायणेन ज्ञायते यत् रामेण सह वनगमनाय समुत्सुकायाः सीताया महत् कष्टं विचार्य अन्तःपुरस्य अन्याः स्त्रियः अश्रूणि प्रवहन्त्यो रामं अब्रुवन्ः-

लक्ष्मणेन सहायेन वनं गच्छस्व पुत्रक।
नेयमर्हति कल्याणी वस्तुं तापसवद् वने।।

वा.रा. 2.27.18

परिवारजनानां माध्यमेन अजस्ररूपेण प्रवहन्ती समरसताया धारा रामायणे सर्वत्र दृश्यते। सीतया रामेण च सह वनंप्रति गमनायोत्सुकं प्राणकल्पं पुत्रं लक्ष्मणं रघुवंशस्य आदर्शान ब्रुवन्ती जननी सुमित्रा लोके पूजनीया धन्याऽस्ति। सुमित्रायाः परिवारप्रेमा युगयुगेभ्यः प्रेरणादायी वर्तते। कथितञ्च-

रामं दशरथं विद्धि मां विद्धि जनकात्मजाम्।
अयोध्यामटवीं विद्धि गच्छ तात यथासुखम्।।

वा.रा. 2.40.19

महाभारतेऽपि कुन्ती, द्रौपदी, माद्री सदृश्यो नार्यो दृश्यन्ते या आत्मना कृतेन सद्व्यवहारेण कुलद्वयस्य कीर्तिं कलयित्वा सम्माननीयाः स्मरणीया अनुकरणीयाश्च जाताः।

द्रौपद्या रूप, शील त्यागादिभिः गुणैश्च मुग्धाश्वश्रूः कुन्ती तस्यै मङ्गलवचनैराशिषं व्यावहरति-

पृथिव्यां यानि रत्नानि गुणवन्ति गुणान्विते।
तान्याप्नु हित्वं कल्याणि सुखिनी शरदां शतम्।

महा. 1.108.11

तपःपूता कुन्ती गान्धारी-धृतराष्ट्रयोः सेवां कुर्वती आत्मनः सर्वसुखान्यत्यजत् शरीरमशोषयत्। अन्ते कुन्त्या महत्त्यागेन तुष्टस्य महर्षि नारदस्याशिषा कुन्ती महललोकं प्राप्नोत्। अस्मिन् प्रसंगे महर्षिनारदो ब्रूते-

तव शुश्रूषया चैव गान्धार्याश्च यशस्विनी
भर्तुः सलोकतामेषा गमिष्यति वधूस्तव
युधिष्ठिरस्य जननी स हि धर्मःसनातनः।

महा. 15.20.18.19

महद्दुःखस्य विषयोऽयं वर्तते यत् निरन्तरं वर्द्धमानेन आर्थिकवैषम्येन व्यष्टिगतचिन्तनस्य प्रभावेण च परिवारेषु सम्बन्धिनां मध्ये समरसतायाः धारा शुष्कतरा जाता। एकसूत्रे बद्धा परिवार मौक्तिकाः सम्प्रति विकीर्णप्राया दृश्यन्ते। परिवार-जनानां मध्ये अन्योन्यस्य कृते सम्मानस्य अभावो जातः। गृहसदस्येषु प्रायः संवादहीनता लक्ष्यते। कुत्रचित् श्वश्रूवध्वोर्मध्ये कलहः प्रवर्तते। अन्यत्र पिता, पुत्रयोः, भ्रातृभगिन्योः, भात्रोः मध्ये भूमि, भवन, सुखसाधनानां कृते विवादों भवति। नित्यं समाचारपत्रेषु दूरदर्शनमाध्यमेन च पारिवारिक- कलहस्य समाचाराः श्रूयन्ते। लोके त्याग, क्षमा, शान्ति, सहिष्णुतादयो गुणा भारतीयानां अभिज्ञानं वर्तते।

**अत्रत्यानां कृते संस्कृतिविरोधि आचरणं घातकं वर्तते। येन केन प्रकारेण परिवारेषु प्रविशन्त् संक्रमणमिदं वारणीयं वर्तते।**

## हिन्दी अनुवाद

भारतीय परिवार अनेक सम्बन्धों की महती संस्था है। यहाँ परिवार की प्रसन्नता का मूल आधार परिवार के सदस्यों में निरन्तर बढ़ते हुए प्रेम-त्याग-करुणा संयम दया आदि सद्‌गुण हैं। इन सद्‌गुणों से समन्वित सभी परिवार जन परस्पर एक दूसरे को सम्मान करते हुए सुख से जीवन व्यतीत करते हैं। इस स्वस्थ परम्परा को जीवित रखने एवं रक्षा करने में नारियों का विशेष योगदान है। नारियाँ विवाह के पश्चात् अपने पति के घर नया परिवेश प्राप्त करके भी पिता के घर से प्राप्त सुसंस्कारों से गुरुजनों के प्रति श्रद्धा से अनुजों के प्रति स्नेह से एवं परिजनों के प्रति उदारता से व्यवहार करती हुई सन्तुष्ट सास, ससुर एवं अन्य परिवार के सदस्यों के मुख से अन्नपूर्णा, गृहलक्ष्मी सम्राज्ञी इत्यादि प्रशंसनीय वचनों को सुनकर कृतार्थ हो जाती हैं। कहा भी गया है –

**हे वधू तुम अपने उत्तम व्यवहार से ससुर,**
**सास, ननद एवं देवर के हृदय की सम्राज्ञी बनो**

कृ. 10/85/46

आदिकाव्य रामायण से ज्ञात होता है कि दीर्घकाल तक अयोध्या में संयुक्त परिवार में निवास करती हुई सीता अपने शील एवं सदाचार से अपने परिवार के सदस्यों को प्रसन्न करती हुई सम्मान की पात्री बनी। सीता के साथ रघुवंशियों की आत्मीयता रामायण में यत्र तत्र दर्शनीय है। राम के साथ वन में जाने के लिए संकल्पिता सीता के दृढ़ निश्चय से सास कोसल्या शोकावेग से संतप्त होकर कहती है –

यह सुकुमारी, तरुणी सुख संसार में निवास करने वाली सीता कैसे घोरवन में निवास करेगी, यहाँ अयोध्या में जो मेरी पुत्र वधू अनेक व्यञ्जनों से स्वादिष्ट भोजन करती थी वही विशाल लोचना अब कैसे जंगली धान से बना हुआ ढंडा गरम भोजन करेगी। वा.रा. 2/61/4

परिवार में आया हुआ संकट न केवल आपत्ति ग्रस्त व्यक्ति के ही दु:ख का कारण होता था अपितु वह कष्ट समग्र परिवार के लिए वेदना का कारण होता था। राम के साथ वन में जाने को उद्यत सीता के महान् कष्ट को विचार कर अन्त:पुर की अन्य स्त्रियाँ सीता को रोकने के लिए रोते हुए कहती हैं –

हे पुत्र राम तुम लक्ष्मण को साथ लेकर वन जाओ यह कल्याणी (सीता) तापस वेष में वन जाने योग्य नहीं हैं। वा.रा. 2/37/18

परिवार के सदस्यों के बीच अजसरूप से बहती हुई समरसता की धारा वाल्मिकि रामायण में सर्वत्र दर्शनीय है। राम और सीता के साथ वन में जाने को उत्सुक प्राणों के समान प्रिय पुत्र लक्ष्मण को परिवार के आदर्शो का उपदेश देती हुई लक्ष्मण की जननी उर्मिला कहती हैं –

(हे पुत्र) तुम वन में भी राम को अपने पिता रशरथ के समान भाभी सीता को मेरे (माँ) के समान एवं वन को अयोध्या के समान मानते हुए सुख से निवास करना।

वा.रा. 2/40.9

महाभारत में भी कुन्ती, द्रौपदी, माद्री के समान नारियों का वर्णन है जो अपने त्याग से दोनों कुलों की कीर्ति बढ़ाती हुई सम्मान के योग्य बनी। द्रौपदी के रूप शील एवं गुणों से मुग्ध सास कुन्ती मङ्गल वचनों से उसे आशीर्वाद देती हुई कहती है –

हे गुणवती द्रौपदी ! पृथिवी पर जितने अमूल्य रत्न है वे तुम्हें प्राप्त हों तथा तुम सौ वर्षों तक सुख प्राप्त करो।

महा/1/108/11

तप: पूता कुन्ती ने धृतराष्ट्र एवं गान्धारी की सेवा में अपने सुखों को त्याग दिया शरीर को सुखा दिया जब नारद जी ने यह देखा तो उन्होंने कहा – हे महाराज आपकी एवं गान्धारी की सेवा करने वाली आपकी वधू एवं युधिष्ठिर की जननी कुन्ती अपने पति के लोक में ही प्रस्थान करेगी।

किन्तु अत्यन्त खेद का विषय है कि वर्तमान समय में निरन्तर बढ़ते हुए आर्थिक वैषम्य एवं व्यक्तिगत चिन्तन के प्रभाव से परिवार में रहने वाले सम्बन्धियों के मध्य समरसता की धारा निरन्तर शुष्क प्रतीत हो रही है। एक धागे में बंधे हुए परिवार के रत्न बिखरते हुए प्रतीत हो रहे हैं। परिवार के सदस्यों में एक दूसरे के लिए सम्मान का अभाव दिखाई देता है। घर के निकट सम्बधियों एवं सदस्यों में प्राय: संवाद हीनता की स्थिति दिखाई देती है कहीं सास बहू के बीच कलह की स्थिति है तो कहीं पिता पुत्र, भाई-बहिन, भाई-भाई के बीच, जमीन जायदा, भवन, सुख सामग्री का लेकर विवाद हो रहा है। नित्य ही समाचार पत्रों एवं दूरदर्शन के माध्यम से पारिवारिक विखण्डन के समाचार प्रकाशित हो रहे हैं। सम्पूर्ण विश्व में त्याग, क्षमा, शान्ति, सहिष्णुता दया आदि गुण भारतवासियों की पहचान हैं। भारत भूमि पर निवास करने वालों के लिए संस्कृति विरोधी आचरण घातक है। परिवारों में घर करने वाले इस संक्रमण का निदान अनिवार्य है।

**-सी-276, भाभामार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# धात्रीफलं त्रिदोषजित्

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**आमलकीफलं श्रेष्ठं रसायनात्मकं भवति। सर्वर्तुषु प्रयोगयोग्यमेतत् फलं त्रिदोषजित् वर्तते। हन्ति वातं तदम्लत्वात् पित्तं तु माधुर्यशैत्यतः प्रशमयति तथा रूक्षत्वात्कषायत्वाच्च कफं हन्ति। इत्थं त्रिदोषजित् धात्रीफलमतीव श्रेष्ठं बहुविधानाञ्च रोगाणां विनाशकं भवति। वीर्येण तु शीतमेतत्फलं रूक्षं दीपनं मेध्यं स्वादुपाकात्मकं चक्षुष्यं बृंहणमनुलोमनं श्वासकासार्शः कुष्ठशोथोदरघ्नं भवति। विशेषेण तु रक्तपित्त प्रमेहघ्न-मामलकीफलं युक्त्या प्रयुक्तं रसायनं सर्वदा स्वास्थ्य-प्रदमायुष्यञ्च भवति। आमलकीरसायन-ब्राह्मरसायन-च्यवनप्राशादयः बहवः प्रयोगाः वर्तमानकालेऽप्यापणे मिलन्ति। बहुप्रचलिताः ह्येते योगाः वर्तमानकालेऽपि जनेष्वतिप्रसिद्धाः सन्ति।**

आमलकी-फल (आँवला) श्रेष्ठ रसायन स्वरूप वाला होता है। सभी ऋतुओं में प्रयोग के योग्य यह फल त्रिदोष को जीतने वाला है। यह अम्ल रसवाला होने के कारण वात को नष्ट करता है, मधुररस और शीतवीर्य होने के कारण पित्त का प्रशमन करता है तथा रूक्ष और कषायरसवाला होने के कारण कफ को नष्ट करता है। इस प्रकार से त्रिदोष को जीतने वाला आँवला अत्यन्त ही श्रेष्ठ है और अनेक प्रकार के रोगों को नष्ट करने वला है। वीर्य में तो शीत यह फल रूक्ष, दीपन, मेध्य, मधुरविपाक वाला, आँखों के लिए हितकारी, बृंहण, अनुलोमन होता है तथा श्वास, कास, अर्श, कुष्ठ, शोथ और उदर-रोगों को नष्ट करने वाला होता है। विशेष रूप से तो रक्तपित्त और प्रमेह को नष्ट करने वाला आँवला युक्तिपूर्वक प्रयुक्त किया गया रसायन, स्वास्थ्य प्रदान करने वाला और आयु को बढाने वाला होता है। आमलकी रसायन, ब्राह्मरसायन, चावनप्रकाश आदि बहुत से योग वर्तमानकाल में भी बाजार में मिलते हैं। अत्यधिक प्रचलित ये योग वर्तमान काल में भी लोगों में अत्यन्त प्रसिद्ध हैं।

**अत्र केषाञ्चित् शास्त्रोक्तानां योगानां प्रकल्पितानाञ्च योगानामुल्लेखः क्रियते। येषु योगेषु निर्माण-प्रक्रियायाः जटिलता वर्तते तेषां त्वत्र केवलं नामोल्लेखमात्रमेव क्रियते। तेषां प्रयोगश्चिकित्सकपरामर्शेन करणीयः। तेषां योगानां निर्माणेऽपि चिकित्सकानामधिकार एव वर्तते। ते हि योगाः पूर्वोक्ताः आमलकी-रसायनादयः तथा धात्र्यरिष्टः, आमलकघृतम्, चरकोक्तमामलकीरसायनम्, चरकसंहितायाः रसायनाधिकारे प्रोक्त 'आमलकावलेहोऽपरः' तत्रोक्त-मेवामलकचूर्णमामलकसहस्रैः पिप्पलीसहस्रैश्च पलाश-तरुणक्षारोदकेऽतिजटिलप्रक्रियातः विनिर्मित आमल-कावलेहः भैषज्यरत्नावल्यां प्रोक्तः आमलकी-खण्डश्चैतादृग्विधाः बहवः शास्त्रोक्ताः योगाः सन्ति येषां प्रयोगः चिकित्सकस्य परामर्शेन रसायनफल-प्राप्त्यर्थमारोग्यावाप्त्यर्थञ्च करणीयः।**

यहाँ कुछ शास्त्रोक्त योगों का और कल्पित योगों का उल्लेख किया जा रहा है। जिन योगों में निर्माण-प्रक्रिया की जटिलता है उनका तो यहाँ केवल नामोल्लेखमात्र ही किया जा रहा है। उनका प्रयोग चिकित्सक के परामर्श से करना चाहिए। उन योगों के निर्माण में भी चिकित्सकों का ही अधिकार है (वे ही सक्षम है)। वे योग पहले कहे गए आमलकी रसायन आदि तथा धात्र्यरिष्ट, आमलकघृत, चरकोक्त आमलकी रसायन चरकसंहिता के रसायनाधिकार में कहा गया 'अपर आमलकावलेह' तथा वहाँ कहा गया आमलकचूर्ण, सहस्र आँवले तथा सहस्र पिप्पली के द्वार ातरुण पलाश के क्षारोदक में अति जटिल प्रक्रिया से बनाया गया आमलकावलेह तथा भैषज्य रत्नावली में कहा गया आमलकीखण्ड आदि इस तरह के अनेक शास्त्रोक्त योग हैं जिनका प्रयोग चिकित्सक के परामर्श से रसायन के फल की प्राप्ति के लिए और आरोग्य की प्राप्ति के लिए करना चाहिए।

**आमलक्यवलेह :-**

**भैषज्यरत्नावल्यां योगरत्नाकरस्यैकः योगः आमल-क्यवलेहनाम्ना समुल्लिखितः, अत्र च तस्य परिवर्तित-स्वरूपात्मकः तदनुरूप एवावलेहः प्रस्तूयते। यस्य च**

निर्माणे सरलता वर्तते, यथा-

**पञ्चकिलोपरिमितं यन्त्रनिष्पीडितं संशुद्धमामलकानां रसं गृहीत्वा मृद्वग्नौ विपचेत्। तत्रैव च 250 ग्रामपरिमितं पिप्पलीचूर्णं दापयेत्। किञ्चित् घनीभूते तु तस्मिन् रसे घृते सम्यक् भर्जितां द्राक्षाफलानां पिष्टिमपि प्रक्षिपेत् तथा 4 किलो परिमितं सितोपलाचूर्णमपि तत्र दातव्यम्। शनैः शनैश्च विपक्वमेतत्सर्वं घनीभूतं द्रव्यं समुद्धरेत्। तत्क्षणमेव च तत्र वस्त्रपूतं 50 ग्रामपरिमितं मधु प्रक्षिपेत्। काचपात्रे संरक्षितस्यास्यावलेहस्य प्रयोगः 25 ग्रामपरिमितायां मात्रायां सायं प्रातः दुग्धानुपानेन करणीयः। रक्तवृद्धिकरो ह्येषोऽवलेहः कामलारोगं पाण्डुरोगञ्च विनाशयति। रसायनफलप्रदो ह्येषोऽवलेहः जाठराग्निवृद्धिमपि करोति। रोगप्रतिरोधकक्षमतायाः वृद्धिं करोति। श्वासघ्नः कासघ्नश्चैषः बलवृद्धिकरो वर्तते। ये हि स्वस्थाः सन्ति तेषु स्वास्थ्यानुवर्तको ह्येषः ऊनविंशतिवर्षात्मिकासु रक्ताल्पतया प्रपीडितासु बालासु विशेषेण लाभप्रदो वर्तते। कुपोषणजन्येषु व्याधिषु चिकित्सकपरामर्शेनावधानतयाऽस्य प्रयोगः श्रेष्ठः फलप्रदो भवति। कस्यांश्चिदपि ऋतौ नियमितरूपेणास्य सेवनं रक्ताल्पतानिवारकं जाठराग्निविवर्द्धकं च भवति। विषमज्वरान्तेऽस्य प्रयोगः दौर्बल्यनिवारको भवति प्लीहवृद्धिञ्चाप्यपकर्षति।**

**आमलक्यवलेह-**

भैषज्यरत्नावली में योगरत्नाकर का एक योग आम्लक्यवलेह नाम से उल्लिखित है। यहाँ पर उसका परिवर्तित स्वरूप वाला उसके अनुरूप ही अवलेह प्रस्तुत किया जा रहा है। जिसके निर्माण में सरलता है, जैसे -

पाँच किलो परिमाण में यन्त्र से निकाला गया शुद्ध (स्वच्छ) ऑवले का रस लेकर मृदु अग्नि में पकाना चाहिए। उसमें ही 250 ग्राम परिमाण में पिप्पली का चूर्ण डालना चाहिए। कुछ गाढा हो जाने पर उस रस में घी में सही ढंग से सेकी हुई (भूनी हुई) मुनक्का की (बीजरहित) पिष्टि को डालना चाहिए और इसी में चार किलो मिश्री का चूर्ण भी डालना चाहिए। धीरे-धीरे पकाए हुए गाढे बने हुए इस सम्पूर्ण द्रव्य को अग्नि से नीचे उतार लेना चाहिए। तत्काल ही इसमें कपड़े से छना हुआ सौंठ का चूर्ण 50 ग्राम की मात्रा में तथा 50 ग्राम ही वंशलोचन का चूर्ण डालना चाहिए। इस अवलेह के ठण्डा हो जाने पर 500 ग्राम शहद डालना चाहिए। काच के पात्र में रखे हुए इस अवलेह का प्रयोग 25 ग्राम की मात्रा में सुबह-शाम दूध के अनुपान से करना चाहिए। रक्त की वृद्धि करने वाला, यह अवलेह कामला रोग को तथा पाण्डुरोग को नष्ट करता है। रसायन का फल देने वाला यह अवलेह जाठराग्नि की भी वृद्धि करता है। रोग-प्रतिरोधकक्षमता की भी वृद्धि करता है। श्वासरोग को नष्ट करने वाला और कास को नष्ट करने वाला यह बल बढाने वाला है। जो लोग स्वस्थ हैं उनमें स्वास्थ्य को बनाए रखने वाला यह बीसवर्ष से कम उम्र वाली बालिकाओं में जो कि रक्ताल्पता से प्रपीडित हैं उनमें विशेषरूप से लाभप्रद है। कुपोषणजन्य व्याधियों में चिकित्सक के परामर्श से सावधानीपूर्वक इसका प्रयोग श्रेष्ठ फलप्रद होता है। किसी भी ऋतु में नियमित रूप से इसका सेवन रक्ताल्पता को दूर करने वाला और जाठराग्नि को बढाने वाला है। विषमज्वर हो जाने के बाद इसका प्रयोग दौर्बल्य को दूर करने वाला होता है तथा प्लीहा की वृद्धि को भी दूर करता है।

**अपर आमलक्यवलेह :-**

**पञ्चकिलोग्रामपरिमितानि सुपक्वान्यामलकीफलानि गृहीत्वा जले स्विन्नानि कर्तव्यानि। अनन्तरञ्च निरस्थिकृतानि वस्त्रेण गालितानि संगृह्यायसपात्रे पूर्वं 500 ग्रामपरिमितं घृतं सम्पूर्याग्नौ निधापयेत् तत्पात्रम्। किञ्चित् परितप्ते घृते परिगालितानां स्विन्नामलकीफलानां पिष्टिं तत्र प्रक्षिप्य शनैः शनैः मन्दाग्नौ भर्जनं कर्तव्यम्। यदा हि पिष्ट्यामुपरि स्नेहस्यामगनं भवति तदा सम्यक् भर्जिता सुपक्वा चैषा पिष्टिरिति मत्वा 3 किलो ग्रामपरिमिताभिः शर्कराभिः सुनिर्मित मत्स्यण्डिकां तत्र प्रक्षिप्य पुनः सम्यक् परिपाको विधेयः। लेहवत् साधु सुसिद्धो ह्येषः योगः इति सुनिश्चित्याग्नितोऽवतारयेत्। तस्मिंश्च एलालवंगपिप्पलीत्वक्केसरादिभिः विनिर्मितस्य सूक्ष्मस्य चूर्णस्य प्रक्षेपः कर्तव्यः। प्रक्षेपस्वरूपात्मके-**

ऽस्मिञ्चूर्णे एलादीनां प्रतिद्रव्याणां पृथक्-पृथक् रूपेण पञ्चविंशतिग्रामात्मिकैव मात्रा भवेत्। केसरनामकस्य तु श्रेष्ठस्य द्रव्यस्य मात्रा केवलं पञ्चग्रामं परिमिता पर्याप्ता। सुशीते त्वस्मिन्नवलेहे 500 ग्रामपरिमितस्य मधुनः प्रक्षेपणमपि समुचितम्। प्रतिदिनमेवास्यावलेहस्य सेवनं प्रातः सायं कर्तव्यम्। मात्रा तु पञ्चविंशतिग्रामात्मिकैव पर्याप्ता। अनुपानं तूष्णोदकमुष्णं वा दुग्धं समुचितम्। अतीव बृंहणो ह्येषोऽवलेहः तुष्टिदः पुष्टिदः श्वासकास-निबर्हणः रसायनफलप्रदश्च भवति। येषु प्रतिश्यायस्य कासस्य च पुनः पुनराक्रमणं भवति तेषु विशेषेण फलदो भवत्येषोऽवलेहः। मेधां स्मृतिनामयत्वञ्च कृत्वेन्द्रियेषु बलमादधाति तथा जराजन्यं दौर्बल्यं व्यपोहति।

**दूसरा आमलक्यवलेह –**

पाँच किलोग्राम परिमाण में आँवले लेकर जल में उबालने चाहिए। उसके बाद गुठली निकाले हुए उन को कपडे से छान कर लोहे के पात्र में (कड़ाई में) पहले ही 500 ग्राम घी डालकर उस पात्र को अग्नि पर चढा देना चाहिए। घी के कुछ परितप्त हो जाने पर छने हुए उबाले गए उन आँवलों की पिष्टि को उसमें डालकर धीरे-धीरे मन्दाग्नि में भूनना चाहिए। जब पिष्टि के ऊपर घी आ जाय तब भूनी हुई अच्छी प्रकार से पकी हुई हो गयी है यह पिष्टि ऐसा मान कर तीन किलो ग्राम परिमाण की शक्कर सेअच्छी प्रकार बनाई गई चासनी को उसमें डालकर फिर अच्छी प्रकार से इसका पाक करना चाहिए। अवलेह की तरह सुसिद्ध यह योग हो गया है ऐसा सुनिश्चित कर के उसको अग्नि से नीचे उतार लेना चाहिए। इसमें इलायची, लौंग, पीपल, दालचीनी, केसर आदि से बनाए गए सूक्ष्य चूर्ण का प्रक्षेप डालना चाहिए। द्रव्य की पृथक्-पृथक् रूप से 25-25 ग्राम मात्रा ही होनी चाहिए। केसर नाम के श्रेष्ठ द्रव्य की मात्रा तो केवल पाँच ग्राम परिमाण में ही पर्याप्त है। अच्छी प्रकार से ढण्डे हुए इस अवलेह में 500 ग्राम परिमाण के मधु का प्रक्षेप भी उपयुक्त है। इस अवलेह का सेवन प्रतिदिन ही प्रातः सायं करना चाहिए। इसकी मात्रा मो 25 ग्राम परिमाण से ही पर्याप्त है। इसका अनुपान तो गर्म जल या गर्म दूध ही उपयुक्त है। अत्यन्त ही बृंहण यह अवलेह तुष्टि और पुष्टि देने वाला, श्वास तथा कास को दूर करने वाला और रसायन का फल देने वाला है। जिन में प्रतिश्याय (जुकाम) और कास का बार-बार आक्रमण होता है उनमें यह अवलेह विशेष रूप से लाभदायी है। मेधा, स्मृति और अरोगता को कर के यह इन्द्रियों में बल प्राप्त करवाता है। तथा जराजन्य दौर्बल्य को दूर करता है।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

## प. रामनारायणशर्म-पुरस्कारेण पुरस्कृतः प्रो. गौडः

राष्ट्रपतिभवने समायोजिते समारोहे महामहिम-शालिना राष्ट्रपतिमहोदयेन श्रीमता रामनाथकोबिन्देन



दिसम्बरमासस्य चतुर्थ्यां तारिकायां जोधपुरस्य डॉ. एस. आर. राजस्थानायुर्वेद विश्वविद्यालस्य कुलपतिचरः प्रो. वैद्यबनवारीलालगौडः पण्डितरामनारायणशर्म (वैद्यनाथ) पुरस्कारेण सम्मानितः। पुरस्कारस्वरूपे भगवच्छ्रीधन्वन्तरिरजत-प्रतिमा, लक्षद्वयरूप्यकात्मकपुरस्कारश्च प्रदत्तः। श्रीगौड़-महाशयोऽनेकपुस्तकानां लेखको जयपुरस्थ-राष्ट्रियायुर्वेद-संस्थानस्य भूतपूर्वो निदेशकश्च वर्तते। बैद्यनाथेन पुरस्कारोऽयं 1982 तम ख्रीष्टाब्दात् प्रतिवर्षं प्रदीयते। परमप्रमोदस्यायमवसरो यदेषः पुरस्कारः राजस्थान-प्रदेशवासिने इदंप्रथमतया सबहुमानं समर्पितः।

एतदुपलक्ष्य राजस्थानसंस्कृतसाहित्यसम्मेलनेनापि श्री गौड़महाशयानां सदुकूलमाल्यार्पणादिना सम्मानोऽकारि। एतदर्थं भारतीपरिवारः सादरं सस्नेहं च वर्धापयति महाशयममुम् इति। संसूचयति कलावटिया राधेश्यामः।

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक **पाञ्चजन्य**

बात भारत की

**हमारी विशेषताएं**

(English) Weekly **Organiser**



- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

**वार्षिक ग्राहक शुल्क**

भारत में ₹ 700/- (साधारण डाक द्वारा) • ₹ 820/- (स्थानीय वितरक द्वारा)

विदेशों में $ 70 (हवाई डाक द्वारा)

REACH MILLIONS OF CONSUMERS THROUGH OUR WEEKLIES

प्रसार विभाग

## भारत प्रकाशन (दिल्ली) लिमिटेड

2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली-11005
फोन : 011-47642000, 01, 02 E-mail : circ@bpdl.in

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20




स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,